स्वर्णिम गुजरात
१९६० -२०१०

॥ शोधप्रविधिप्रवेशः ॥



श्रीसोमनाथसंस्कृतयुनिवर्सिटी
वेरावलम् - गुजरातम्

।। शोधप्रविधिप्रवेशः ।।

(भाग - १)

प्रेरणास्रोतांसि एवं मार्गदर्शकाः

श्रीकुलपतिवर्याः

प्रॉ. पङ्कज एल. जानीजीमहाभागाः

लेखकः

डॉ. देवेन्द्रनाथ पाण्डेयः

प्रकाशनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाषः - ०२८७६ - २४४५२८, २९, ३२ फेक्स : २४४४१७

e-mail : sssu.veraval@gmail.com,

www.shreesomnathsanskrituniversity.info

प्रकाशकः -

डॉ. विष्णुः पुरोहितः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५

जुनागढजनपदम् (गुजरात)

प्रथमं संस्करणम् - फरवरी, २०१३

प्रतयः - ३००

मूल्यम् - रु. १००/-

मुद्रकः -

एच. के ओफसेट, वेरावलम्

॥ शुभाशंसनम् ॥

विद्यायाः प्रकाशनं बहुविधं भवति। कदाचित् अध्यापनेन, कदाचित् अध्ययनेन, कदाचित् प्रवचनेन च। परन्तु उपर्युक्ताः प्रकाशनमार्गाः अपेक्षितविद्याप्रकाशनं न कुर्वन्ति यावद्ग्रन्थप्रकाशनं विद्याप्रकाशनं जने–जने करोति। अत एवोक्तम् "पुस्तकी भवति पण्डितः"। अर्थात् यस्य पार्श्वे पुस्तकानि बहूनि विविधानि च भवन्ति स पण्डितो भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः एकत्र तु संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे समर्पितकालो वर्तते तदाऽन्यत्र नूतनसाहित्यसर्जनां कारयितुं तस्याश्च प्रकाशनं कारयितुं दत्तावधानोऽस्ति। अस्मिन्नेव शुभे पुण्ये च सन्दर्भे **'स्वर्णिमगुजरातजयन्ती'**- अवसरे तथा बेङ्गलूरुनगरे आयोजितायां **'विश्वसंस्कृतपुस्तकमेलायां'** श्रीसोमनाथसंस्कृतविश्वविद्यालयः बहूनां ग्रन्थानां प्रकाशनं करोति। संशोधनकर्तॄणां कृते **शोधप्रविधिप्रवेशः** नामधेयः ग्रन्थोऽयं महते लाभाय भविष्यति। अस्य ग्रन्थस्य प्रसाराय अहं शुभाशंसनं प्रकटीकरोमि।

॥ जयतु सोमनाथः जयतु संस्कृतम् ॥

प्रो. पङ्कज एल. जानी

कुलपतिः

॥ प्रस्तावना ॥

समुद्रमन्थनमपि महाप्रयास आसीत् संशोधनस्य देवदानवानाम्। आधुनिके कालेऽपि सृष्ट्युत्पत्तिः कथम् अभवत् ? तदर्थं महाभियोगः महाप्रयोगः वा जगतः महावैज्ञानिकाः संमिल्य कृतवन्तः। कस्यापि महाप्रयासस्य महाप्रयोगस्य वा प्रारम्भो जायते मनसि। मनोदृष्टिः आवश्यकी संशोधनाय। एषा दृष्टिः कीदृशी स्यात् ? संशोधनस्य च वैज्ञानिकस्वरूपं कीदृशम् ? अनुसन्धानप्रवृत्तिः कथं करणीया ? इत्येतत् सर्वं ज्ञातुं शोधप्रवेशः भवतु। भारते बहुषु विश्वविद्यालयेषु बहवः छात्राः संशोधनरताः सन्तः पीएच.डी. तथा एम.फिल्. कुर्वन्तः सन्ति। तस्मात् पूर्वं तेषां शोधप्रवेशः स्यात् इति हेतुना क्रियते किञ्चित् मन्थनमत्र। मन्थनेन प्राप्स्यते नवनीतामृतम् इति आशास्महे वयम्। एषा कल्पना सदा सर्वदा विलसति श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मान्यानां कुलपतिवर्याणां प्रॉ. पङ्कज. एल. जानीजी-महाभागानां हृदये। तेषां महत्या प्रेरणया मार्गदर्शनेन च समभवत् कार्यमिदं तदर्थं तेभ्यः धन्यवादान् ज्ञापयामः। एम. फिल्, पीएच.डी. कुर्वतां छात्राणां कृते पुस्तकमिदं महते लाभाय कल्प्यते।

डॉ. देवेन्द्रनाथः पाण्डेयः
वेदविभागाध्यक्षः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,
वेरावलम्

अनुक्रमणिका

***

।। शोधप्रविधिप्रवेशः ।।

अनुसन्धानम्ः-

वैज्ञानिक-सिद्धान्तानुसारमूर्जा (Energy) अविनाशशीला[१] भवति। यतो हि प्रकृतिः स्वयं नित्या भवति, प्रकृतेरेव सम्पूर्णो हि संसारः[२] प्रपञ्चरूपः। सर्वेषां पाञ्च-भौतिक-तत्त्वानामूर्जणाञ्च प्रकृतिरेव स्रोतः। प्रकृतेः नित्यत्वात् तस्याः गर्भप्रसूतोर्जाऽपि नित्यैव भविष्यति। अपरेऽस्मिन् शब्दे प्रकृतिरेव नित्यशक्तिरूपा, तस्या एव विकृतयः संसारस्य सर्वे पदार्थाः तस्मादेतन्मन्यते यत् नित्या सा प्रकृतिः ऊर्जां जनयति स्थापयति च सर्वेषु चैतन्याऽचैतन्यपदार्थेषु। अत एतत् सुस्थिरं भवति यत् नित्या ऊर्जा परिवर्तिता जायते विकसिता चोपजायते परन्तु त्रैकालिक-विनाशो न भवति तदूर्जायाः। अस्मादेव कारणात् चिकित्साक्षेत्रे, आभियान्त्रिकी- क्षेत्रे सामाजिक -क्षेत्रे त्समस्यानां समाधानं प्राकृतिक-पदार्थसमवायादेवान्विष्यते शोधार्थिभिः।

अनुसन्धानशब्दार्थोऽपि पूर्वोक्तमेव[३] भावं प्रकटयति पाठकानाम् समक्षम्। अतः प्राप्तानां प्राकृतिकाप्राकृतिक-पदार्थानां निमयपूर्वक-सेवनाभावात् शरीरे रोगोत्पत्तेः समस्या, अज्ञात-तकनीकि-कारणाच्चाभियान्त्रिकी(Engineering) क्षेत्रे समस्योत्पत्तिः, प्राकृतिक-समाजसंरचना-संरक्षण-नियमावहेलनात् अज्ञानाद्वा प्राकृतिक समाजनियमानाम् समाज-प्रबन्धन-क्षेत्रे च समस्यासमुद्भावोऽनुभूयते। तथैव साहित्यानुसन्धानक्षेत्रे, कलाऽनुसन्धानक्षेत्रे, भाषानुसन्धानक्षेत्रे चाऽपि शोधार्थिभिरवगन्तव्यम्। दृष्टश्च विजातीय-वृक्ष-संयोगात्तृतीयप्रकारकवृक्षोद्भवः।

अत एतदायाति यत् अनुसन्धीयते विशेषसाधनैः मूलं स्वरूपं पदार्थस्य, नवीनपदार्थोत्पत्तये, बाह्यागतानां समस्यानां समाधानाय चोपाय प्राप्यते येन माध्यमेनवा तदनुसन्धानमिति भावः। विद्यमानादेव वस्तुनः कश्चिद्विशिष्टोंशः भौतिकजगतः जनसम्प्रदायस्य चोपयोगाय निश्चयीकरणं तस्य मौलिकस्वरूपस्य व्यवहार्यत्वमपि येन माध्यमेन प्रज्ञाकर्तृत्व-भौतिकसाधनेन वा प्रमाणी क्रियते तदप्यनुसन्धानमिति प्रतिपादयितुं शक्यते। अत एव सर्वेषां सांसारिक-पदार्थानां मौलिकं तत्त्वं परमाणु[१] तत्त्वं निश्चीयते विज्ञानविद्याविशेषज्ञैः, कतिपय दार्शनिकाचार्यैश्च। अथवा नियतिप्रदत्तया मानवप्रज्ञया यत् कल्पनाप्रसूतं वा कल्पनीयं, असंभवं वस्तुः, तत्सिद्धये भौतिकाभौतिक-साधनोपयोगेन साद्देश्यमुद्यमः अनुसन्धानमुच्यते।

अनुसन्धानप्रवृत्ति-हेतवः -

(१) स्वाभाविक जिज्ञासा[१]

"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" - इत्यत्र अपि शब्दबलेन विशेषज्ञानवतां विषयविशेषज्ञानां ग्रहणं भवत्ति। अत एतत् कल्प्यते यत् साधारणोऽपि जनः जीवो वा कंचित्प्रयोजनं हृदये निधायैव कस्मिंश्चित्कर्मणि प्रवर्तते तदा कथं शिक्षितः, विषयविशेषज्ञो वा जनः प्रयोजनं हृदये निधाय कर्मणिनप्रवर्तेत।

अतोऽत्रानुसन्धानप्रवृतौ जिज्ञासाऽपि कारणीभूतां मन्यते। ज्ञातुम् इच्छा जिज्ञासा[२] भवति। जिज्ञासाऽपि कदाचिद् ज्ञानपूर्विका भवति, कदाचित् स्वाभाविकतर्काश्रिता, कदाचिदुभयविहीना, कदाचिद्ज्ञातवस्तुनः गह्वरे स्थितस्यकस्यचिन्मौलिक-तत्त्वावगमनाय, कदाचिदन्यथैव भवति। अतः अनुसन्धान-कर्मणि प्रवृत्तिहेतुरस्ति जिज्ञासा प्रथमं कारणम्। अस्मादेव कारणात् **"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्"** -इत्युक्तमुपनिषदि।

(२) संभावित-तत्त्वोपलब्धिः

अनुसन्धान-प्रवृत्तौ खलूपब्ध-वस्तूनां मन्थनेन परिशीलनेन तुलनात्मक-गुणधर्माणां परीक्षणेन च संभावितस्य तत्त्वस्यावगमनम्, तस्य सांसारिक-समस्यासमाधानाय चोपयोगः, वा कारणं भवति। कदाचिज्जिज्ञासोपशमनाय कृतमनुसन्धानमपि शोधकर्मणि कारणं भवति। उदाहरणार्थं दार्शनिक-क्षेत्रे, ऋषयः प्रादुर्भूय लोके सर्वान् सांसारिकान् पाञ्चभौतिकपदार्थान् अलूलुकन् ततश्च सर्वान् तान् पदार्थान् सखु-दुःख-मोहमयानन्वभवन्। एतेषां त्रिविध-सांसारिक-भावानामानुकूल्यं, प्रातिकूल्यं मोहात्मकं चावस्थां ते निर्धारियामासुः। तेषामपि प्रादुर्भावः प्रकृतेः पाञ्चभौतिक-प्रपञ्चाद्भवतीति अवकलयामासुस्ते। क्रमेण सर्वं मनस्यवधार्य ते विदाञ्चक्रुस्तच्चैतन्यः कश्चित् पुरुषोऽस्य विशालसंसारतरोः प्रवर्तयिताऽस्तीति निश्चयामासुः। तदुपलब्धये चाध्यात्मिक उपायान् शास्त्रोक्तान् चाचिन्तयन्। अग्रे काले-काले साधवोऽपि नानोपासनापद्धतिमवलोक्य तत्तत्त्वं प्रमाणयामासुः। एतत्-क्रमिको हि अनुसन्धान-प्रक्रम-विकासः आध्यात्मिक-क्षेत्रे, दार्शनिक-क्षेत्रे च संभावित-तत्त्वोपलब्धिरस्ति।

विज्ञान-क्षेत्रे चाधुनिंकदृष्ट्या चिकित्सा-विभागेमानवरचनायां स्वभाव-रोग-प्रवृत्ति-मति-स्तरादिज्ञानाय नानारोगाणा मानुवंशिक कारणतत्त्व-ज्ञानाय स्रोतसः Jeans (जीन्स) इत्यस्यान्वेषणमप्यस्यैवानुसन्धान-कारणस्योदाहरणं भवितुमर्हति। आभियान्त्रिकी-क्षेत्रे (In the field of technology) विधीयमानानि विकास-कार्याणि, रसायनशास्त्र-क्षेत्रे, अन्तरिक्ष-विज्ञानानुसन्धान-विभागे च प्राप्तानिशोध-फलानि खल्वपि अस्यैव हेतोरुदाहरणानि सन्ति।

समाजशास्त्र-क्षेत्रे सामाजिकसमस्यानां समाधानायोपलब्धस्थितीनां सर्वेक्षण-विश्लेक्षण-विधिना नीतिनिर्धारणं, तासाञ्च नीतिगतधारणानां संवैधानिक स्वरूपप्रदानानन्तरं सामान्यीकरणार्थं च तासां व्यवहारेऽनुवादोऽपि अस्यैवानुसन्धान हेतोरुदाहरणमस्ति।

कार्यकारण-भाव सम्बन्धज्ञानम् :-

केषाञ्चिज्ज्ञनानां मतेऽनुसन्धानप्रवृत्तिर्भवत्यनुप्राणिता, कस्यचित्पदार्थ-संरचना-सन्दर्भे कार्य-कारण-भाव सम्बन्ध ज्ञानम्। एष हेतुः प्रेरक तत्त्वं वा सामाजिक-प्रबन्धन-चिकित्सा-मनोविज्ञान-प्रमुखक्षेत्रीयानुसन्धानसम्बन्धि भवति। सामाजिक-संगठन-प्रसंगे सामाजिक विसंगति-क्षेत्रेऽनुसन्धानविषये लब्ध-प्रतिष्ठानां समाजशास्त्रिणां कृते प्रमुख एष हेतुर्भवति। तथैव चिकित्सा-क्षेत्रेऽपि कस्यचिद् स्पार्श-प्रसृत-रोगाणामवरोधाय चिकित्सकाः स्वास्थ्यवैज्ञानिकाश्च, तस्यरोगस्य मौलिकं स्वरूपं निश्चीय, तद्हेतुमन्वेषयन्ति। ज्ञाते जाते हेतौ, तद्धेहेतुनिरोधाय, कस्यचिदौषधेरन्वेषणंपरीक्षणञ्च विदधति ते वैज्ञानिकाः। ज्वलन्तमुदाहरणं प्रस्तोतुं शक्यते पाठकानां समक्ष Hini or ''स्वाइनफ्लू''-इति रोगस्य। एतत्कार्य-कारण-सम्बन्धज्ञानं प्रायशः व्यापकं हेतुत्वेनांगीकर्तुं युज्यते। प्रबन्धन-क्षेत्रे, औद्योगिक-क्षेत्रेऽप्येतदेवकारणं शोध-प्रवृतौ मुख्यं भवति-यत्रापणक-स्थित्यनुसारं पदार्थ-समुत्पादने नूत्ना तकनीकी (Technical) अन्विष्यते। अस्माकं भारतीयदार्शनिक-क्षेत्रेत्वस्यकारणस्य महतीभूमिकाऽस्ति तत्त्वान्वेषणप्रवृत्तौ। अत एव सांख्यशास्त्रे सत्कार्यवादस्यातिगहनं चिन्तनं प्रवर्तते। तथैव न्यायवैशेषिकादिशास्त्रेष्वपि तदात्मकस्य कारणस्यास्ति महत्वं वस्तुनः प्रकृतिज्ञानाय। भारतीय-संस्कृतौ खलु अदृष्टादि पुण्यादि वावस्तु तत्कार्य-कारण-सिद्धान्ताधारितमेवास्ति यस्यान्वेषणमस्माकं पूर्वपुरुषैः, वैदिक-ऋषिभिश्च व्यधायि। अवापि च तैः साफल्यम्।

एतत्प्रकृतिशोधस्यैव फलं यत् वेदे संसार-सृष्टेः मौलिकानि तत्त्वानि पञ्चभूतानि वैदिकैः ऋषिभि अभिरन्विष्यास्माकं पुरः स्थापितानि, येषामपलापं नकश्चिदाधुनिको वैज्ञानिकः प्राचीनो वा, प्लेटो, अरस्तु-प्रभृतयोदार्शनिकाश्च वा कर्तुं प्राभवन्। प्राचीनबौद्धिकादि-स्म्पदां ग्राह्यत्व-साधनाय, सामयिकत्वञ्च-परीक्षणाय स्वाभाविक-प्रवृत्तिः कारणात्।

सर्वेषां साहित्यिक-सर्जनानांमूलं परम्परैव भवति; अत एव धर्मशास्त्रेषु परम्परायाः वेदवत्प्रामाण्यमङ्गीकृतमस्ति। तथैव गीतायामपि भगवान् ब्रूते "स्वधर्मे निधनं श्रेयः परधर्मोभयावहः" इति यस्य तात्पर्यमिदमस्ति यदनवच्छिन्नधारया याऽस्माकं परम्परा आगच्छन्ती वर्तते तस्याः परिपालनं अवश्यमेव कर्तव्यम् । तदाऽस्मिन् प्रसंगे तस्याः पारम्परिकबौद्धिकादि सम्प्रदायाः आधुनिक-दृष्ट्या परिशीलनेनापि तार्किक-रीत्या पुनस्तस्याः स्वरूपं समाजस्य समक्षमवश्यमेवोपस्थापीनयं भवति शिक्षित-पुरुषैः। अस्मादेवकारणात् स्मृतिसाहित्य-बाहुल्यं, तदाधारित परम्पराबहुलताऽपि दृश्येते। कारणमस्ति यदृषयोऽह्यस्माकं काले-काले मानव-समाजस्य पूर्वनिर्धारितमान्यतायां सततमनुसन्धानं विधाय युगानुरूपं नियमान्रचयामासुः। उदाहरणार्थं मनुस्मृति-याज्ञवल्क्यस्मृत्योः, अथवा मनु-पराशरयोः, अन्ययोः कयोश्चिद्द्वयोर्मध्ये वा तुलना त्मकाध्ययनं विधातुं शक्यते। सैवरीतिरस्ति विज्ञान-प्रौद्योगिकी-क्षेत्रे, विश्व-धर्मसिद्धान्तोद्भव-विकासक्षेत्रे, धर्म-दर्शन-विचारक्षेत्रे, भाषा-साहित्यक्षेत्रे, तद्वदेवान्यत्रापि। परन्तु कदापि प्राचीनां परम्परां बौद्धिक-सम्पदामुपेक्ष्य, सर्वदैव वा विहाय न लोकोऽग्रे गच्छति। अतः अनुसन्धान प्रेरकतत्त्वेषुप्राचीन-बौद्धिकादिसम्पदां ग्राह्यत्व-साधनाय, सामयिकत्वञ्च-परीक्षणायाऽपि मानवोऽनुसंधान-क्षेत्रे प्रवर्तते। एषा प्रवृत्तिर्मानवानामारोपिता प्रायशो न भवति प्रत्युत्सहजरूपा भवति।

चिन्तनविकास - क्रमः -

अनुसन्धानं बुद्धेः सात्त्विक-व्यापारस्य[१] फलमपि वक्तुं शक्यते। मनोविज्ञानसिद्धान्तानुसारं बुद्धिः सदैव अध्यवसाय-युता, व्यापारशीला[२] च भवत्येव तथापि विशुद्धाविशुद्ध-वास-वातावरणप्रभावेणाऽध्यवसायात्मिका बुद्धिस्तु कदाचिल्लौकिक-व्यापारे रमते कदाचिच्चेयं पारलौकिकं[३] वस्तु विज्ञानाय यतते। अलौकिकमध्यात्मं वा परमं पुरुषार्थरूपं वस्तुप्राप्य[४] तत्रैव शाश्वतरूपेण सुखमनुभवन्ती न ततःप्रत्यावर्तते। यौगिकोऽयमध्यवसायः बुद्धेः। अतएव भगवता कृष्णो गीतामाध्यमेन

प्रोक्तवान्- ''यत्रगत्वा न निवर्तन्ते[५] तद्धाम परमं मम'' इति। परन्तु अन्या शोधात्मिका बुद्धिरवश्यमेवाङ्गीकार्या योच्चशिक्षणक्षेत्रेण सत्संगत्या विदुषां समवाय-सम्पर्केण चानुदिनं विवर्धमाना लौकिकेषु वस्तुषु अलौकिकं वस्तु, अलौकिकेष्वपि वस्तुषु लौकिकं वस्तु, लौकिकेषु वस्तुषु सूक्ष्मरूपेण स्थितं लोकोपकारिणं तत्त्वं प्राप्तुं प्रयतते। आधुनिकोच्चशिक्षणायामे खलु बुद्धिर्विकसिता भवन्ती प्राप्तविद्यासरण्यामेवाग्रे किञ्चिन्नूत्नस्य तत्त्वस्यान्वेषणैकाग्रतामवस्थां धते। एष एव चिन्तनविकासक्रमः शोध-व्यापारे नियोजयति जनान्। अतः उपर्युक्तेषु शोध-प्रवृत्तिहेतुष्वन्यतमोऽयमपि हेतुरिति संकेते न संकोचः। चिन्तनधारा शिक्षितमतिषु सर्वदैव नवं नवं ज्ञानरसं प्रसूते।

अनुसन्धानार्थः -

व्युत्पत्या, सामान्य-शब्दार्थेन, परिभाषया च कस्यचिदपि नाम्नः अभिधानस्य वाऽर्थोवगम्यते। अनुसन्धानम् - शब्दोऽपि विश्लिष्यते विद्वदिभरुपरितनैराधारैः। केचन तावत् परिभाषाऽपेक्षयाऽनुसन्धान-शब्दस्य पर्यायवाचिभिः पद-पदार्थैरपि तदर्थावबोधनाय यतन्ते; अतोऽत्रापि यथाशक्यमनुसन्धानम्-इत्यस्य, शोधस्य चार्थं परीक्षितुं प्रयासो विधीयते। अत्रावधेयमस्ति यदस्मिन्-पुस्तके शोधः अनुसन्धानम्, संशोधनम्-इत्यादि शब्दाः एकस्मिन्नेवार्थे गृहीत्वा व्याख्याताः, तद्गताश्च पदार्थाः परिशीलिताः भविष्यन्ति। यद् रीसर्च(Research)पदमस्ति तस्य प्रवृत्तिनिमित्तानि विषयानुसारं, अवस्थानुसारं भिद्यन्ते। तात्पर्यमिदमस्ति यत् अनुसन्धानम्-विज्ञानक्षेत्रं परिव्याप्य गवेषणारूपं धत्ते, यदुक्तं केनचित् यत् ''Discovery'' शब्दः गणेषणाभावमभिधते, तथैव Invention इन्वेन्सन-पदार्थोऽपि। कलाशास्त्र-भाषा-साहित्य विषयेषु शोधः अनुसन्धानम्, संशोधनम् - इत्यादि प्रसिद्धाः शब्दाः प्रयुज्यन्ते विद्वद्भिः।

व्युत्पत्त्यनुसारम् - अुनसन्धानम् - इति शब्दः अनु-सम + धा[३] + ल्युट् (करणे)-इति उपसर्ग-धातु-प्रत्यानां संयोग शक्त्या निर्मीयते, यस्य, सम्बन्धाद्यर्थाः भवन्ति। तत्रैव जीर्णोद्धरणमप्येको पदार्थोऽस्य पदस्य भवति। अनेनार्थेन सहाद्यतनीयस्यानुसन्धान-प्रविधि-गतस्य शोधापरपर्यायस्यानुसन्धान-पदस्यार्थ-साम्यता स्थाप्यते चेदर्थोभवत्यनुसन्धानस्य, यच्छास्त्रगताः प्राचीनपरम्परामाध्यमेन पदार्थाः श्रूयन्ते, तस्योद्धारः प्रकटीकरणं च येन वैज्ञानिक-विधिना विधीयते उपस्थाप्यते तदनुसन्धानम्

तत्रैव हि कस्मिश्चित्पदार्थेऽन्तर्निहिततत्त्वस्य मानवकल्याण-दृष्ट्या, अथवा मानवीयमूल्य[१] (साहित्यदृष्ट्या परिशीलने) सामान्यीकरणदृष्ट्या च परिशीलने [२] प्रक्रिया-माध्यमेन सोपपत्तिकं उदाहरणं प्रस्तूयते तदव्यनुसन्धानम्। आङ्लभाषायाः Research (रीसर्च) शब्दः अपि तमेवानुसन्धानस्यव्युत्पत्त्यर्थं पुष्णाति। तात्पर्यमिदमस्ति यत् Research शब्दे Re+search इति द्वौ अंशो वर्तेते यस्यार्थो भवति पुनरन्वेषणम्। एतदत्राध्यातव्यमस्ति यत्संसारे पाञ्चभौतिक पदार्थेभ्यः भिन्नः नातिरिक्तः कश्चिदव्यवहार्यः- न चाव्यवहार्यस्य पदार्थस्य कृते कश्चिदस्त्यभिधानम् नाम वा - अतएव न्याय-वैशेषिकयोरभिधेयत्व-प्रमेत्वयोः व्यवहार-विषये व्याप्तिः प्रदर्शिता। अतएवैतत् संकेतयति यत् प्रकृतौ सार्वकालिकाः सर्वपदार्थाः सर्वदैव तिष्ठन्तो वर्तन्ते। ऋषि-देव-मनुष्याः स्वसीमितजीवनव्यवहारस्यानुकूलानि नामानि तेषुव्यवहार्यपदार्थेषु प्रवाहयन्ति। मानवमस्तिष्कप्रभवेभ्यः पदार्थेभ्यश्चान्येऽपि भिन्नाः पदार्थाः भवन्ति येषामनुसन्धानं कालान्तरे भवति। अतः यन्निहितंविद्यते तस्यावाप्तिः यदा क्रियते तदपि भवत्यनुसन्धानम्, अन्वेषणं वा। सत्कार्यवाद-सिद्धान्तानुसारमप्येष विषयः सिध्यति। अतः विद्यमानकारणात् कदाचित्कार्यभूतस्य, प्रतिक्रियारूपस्य यदन्वेषणं, अनुसन्धानं वा तदेव रिसर्च-पदार्थः। भारतीयशास्त्र-समवायेऽनुसन्धान-शब्दः, विचार-संयोग-गवेषणाऽनुशरणमित्यादि-भावानां वाचकः। भारतीय-प्राचीन-परम्परायां प्राप्तायाः विद्यायाः विकासाय चातुर्विध्यं तस्यो प्रयोगः प्रोक्तः। यथा आगम-कालेन, स्वाध्यायकालेन, प्रवचन-कालेन व्यवहार-कालेन च। तत्राधुनिकानुसन्धान-सन्दर्भे सर्वेषामेतेषां विश्लेषणं यदा क्रियते तदा स्वाध्यायकालः बीजमुत्पादयत्यनुसन्धानस्य तस्याध्येतृ-मतौ। अत एव स्वाध्यायविधिमाश्रित्यैव मीमांसायां धर्मविचारतत्त्वंविश्लिष्यते - यथा

स्वाध्यायोऽध्येय इत्यस्य विधानस्य प्रयुक्तितः।
विचारशास्त्रमारभ्यं नारभ्यं वेति संशयः।

अर्थधीहेतुताधीतेर्लोकसिद्धावघातवत्।
नियामकं न चैवातो वैधारम्भो न सम्भवी॥२॥

दर्शापूर्ववदस्त्यत्र क्रत्वपूर्वं नियामकम्।
अर्थनिर्णायकं शास्त्रमत आरभ्यतां विधेः॥

अत्र स्वाध्याय-कालप्रसंग एव काचिज्जिज्ञासा "अथ को धर्मः" - हृदये समुदेति "**यज्ञेन यज्ञमयजन्तदेवास्तानिधर्माणि प्रथमासन्न**" इति मन्त्रगतं धर्मपदार्थमुपलभ्य हृदि - ततश्चान्वेषणप्रविधौ प्रवर्तते मीमांसायां कश्चिद्-ऋषिः। अद्यापि सिद्धान्त एषः प्रायोगिकोऽस्ति-रिसर्च-सम्प्रदाये। अतः सन्धानार्थो भवति द्वयोः वस्तुनो मेलनस्य, परस्परं लक्ष्य-साधनाय अर्थात् प्राप्तज्ञानं वैषयिकं, यदा भूयो-भूयोऽभ्यसनेनान्तः करणे प्रकाशं जनयति, तदा प्रज्ञा-योगं विधाय नूतनलक्ष्यीभूतं मनसा प्रकल्पितं तत्त्वमन्विष्यते। तस्यापि निदर्श नमुपनिषदि प्राप्यते "**प्रणवोधनुः शरो ह्यात्मा, ब्रह्मतल्लक्ष्यमुच्यते। अप्रमत्तेन वेद्धव्यं शरवत्तन्मयोभवेत्।**" इति - रूपेण। अत्राध्यात्मिक - तत्त्वावाप्तये विधिरेष च उपदिष्टः सैवविधिरद्यशोध प्रविधावपि संघटते। अत्र यद्यनुरूपलक्षणं वर्तते साधनस्य, प्रकल्पना (Hypothesis)[१] यत् लक्ष्यमुपलक्षयति, वाणश्चैकाग्रता-माध्यमेन शोध्यस्य वस्तुनोऽन्तः प्रदेशप्रवेशश्च द्योतयति। अतोऽत्रानुसन्धान-शब्दस्यार्थः सम्यक् संघटते।

अन्यत्र[२] च अनु = पश्चात्, आभिमुख्येन स्थापना वा संयोजना वेत्यनुसन्धानमित्याह। अत्रावधेयमस्ति यत् प्रत्यक्षीभूतस्य पदार्थस्यात्यन्तमेवसूक्ष्मतत्त्वान्वेषणमनुसन्धानम् भवति। कदाचित्सूक्ष्मतत्त्वान्वेषणेन सह तद्गतगुणधर्म-परीक्षणं यदा क्रियते, तथा चोपादानहानोपेक्षा-बुद्ध्या च तस्य तत्त्वस्य परिशीलनं विधीयते, तदप्यनुसन्धानमेवोच्यते।

अस्माकं संस्कृतवाङ्मयेऽस्यानुसन्धानशब्दस्य बहूनि प्रवृत्तिनिमित्तानि दिर्दिष्टानि सन्ति। तेषामनुसारं द्वयोः पदार्थयोः संसर्गेण तृतीयस्यपदार्थस्याभिनवतत्त्वरूपेण प्रापणं येनविधिना भवति तदनुसन्धानपदार्थः। विशेषरूपेण कला-साहित्यक्षेत्रे कस्यचिद् वस्तुनः, परिशीलनक्षेत्राधिक्येन, बहुमार्गाणां तेन वस्तुना सह सम्बन्धसिद्धिरप्यनुसन्धानम् भवति। पाञ्च-भौतिकतत्त्वानां, तन्निर्मितानाञ्चपदार्थानं दोहनाय, तद्दोहनस्य च लोकभोगायोपयोगोऽप्यनुसन्धानम्। साहित्यक्षेत्रे कविविशेषस्य, काव्यविशेषस्य, काव्यगतभावना-विशेषस्य विशदीकरणेनायामवैविध्याव-लोकनमप्यनुसन्धानम्। भाषाविशेषस्य वैज्ञानिकसमीक्षणम्, काव्यसिद्धान्तस्य च साहित्यविशेषे सूक्ष्मपरीक्षणम्, कस्यचिदपिग्रन्थस्य मानवीयमूल्यधिया विवेचनप्रकार-विशेषोप्यनुसन्धानम्। सम्पादनक्षेत्रे, प्राचीनहस्तलिखितानां ग्रन्थानां समीक्षा-

पूर्वकमालोचनापूर्वकमध्ययनमप्यनुसन्धा नमद्योच्यते। पारम्परिक-रीतेः, सभ्यतायाः ऐतिहासिकमनुशीलनमप्यनुसन्धाम्। स्वास्थ्यविज्ञानदृष्ट्या, वनस्पतीनां विशेषतत्त्वविज्ञानेन, प्रयोगशालायामपि तस्य परीक्षणेन प्राप्तपरिणामस्य व्यवहारे मान्यताप्रदानमपि खल्वनुसन्धानमेव। अद्यत्वे प्रबन्धनक्षेत्रे बहूनि प्रबन्धनानि प्रचलितानि विकसितानि च सन्ति, तत्र नित्यनूतनपदार्थपरिशीलनपरिणामेन भिन्नायाः प्रबन्धन-शाखाया आविष्कारोऽप्यनुसन्धानफलमेव। व्यवसायिकदृष्ट्या, आर्थिकदृष्ट्या सर्वेक्षणपद्धतिमनुसृत्य कृता गवेषणाऽप्यनुसन्धानमेव। कस्यचिदपि पुराण राद्धान्तस्याधुनिक-दृष्ट्या सप्रमाणं तस्यपुनःपरीक्षणं तदाधारेण नूतनसिद्धान्तावस्थापनमपि चानुसन्धानमेव। राजनीतिक्षेत्रे, समाजशास्त्रक्षेत्रे, तथैव भौगोलिकविषयक्षेत्रेऽप्यागतानामनुभूयमानानामपि समस्यानां विशेष-शोधप्रक्रियायाः वैज्ञानिकदृष्ट्या गम्भीरो हि विचारः, तदाधारेण सकारात्मकपरिणामप्राप्तिरपि वक्तुं शक्यते ऽनुसन्धानम्।

तथैव भ्रमापनोदनविषये, सन्दर्भादिमाध्यमेन, स्वप्रकल्पनापरिणामसाफल्य-मप्यनुसन्धानम्। युगपरिवर्तन-प्रकृति-परिशीलनेन तन्मूलतत्त्वान्वेषणमपि शोधप्रकारस्यान्यतमं फलम्। तथैवानुसन्धानम् व्याप्नोति सम्पूर्णं जगत्। तात्पर्यमिदमस्ति यत्-समुद्रक्षेत्रात् नभसः क्षेत्रं यावत्, यावन्तोऽपिविषयाः, आधिभौतिकक्षेत्रे, आधिदैविकक्षेत्रे, आध्यात्मिकक्षेत्रे च विशेष-विचारविकासश्चेति तत्र सर्वत्रैव शोधस्यानुसन्धानस्य वाऽर्थोव्यापको भवति। औपनिषदिक-शास्त्रसिद्धान्ताधारेणास्य जगतः प्रादुर्भाव एवानुसन्धानस्यार्थः, अत एवोच्यते हरिणा- **"विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः"** तथैव जगतोविषये विवर्तवाद-विकारवादयोरपि सम्बन्धः ऋषीणां शोधात्मिकायाः प्रज्ञया एव वर्तते। परन्तु शास्त्रीयक्षेत्रानुसारं शोध-प्रारूपवैभिन्याधारेणानुसन्धानम् बह्वीषुपरिशीलनधारासु प्रवहद्-दृश्यते। अतः उपर्युक्ताः मन्ये प्रोक्ताः विषयाः अप्रोक्तविषयाणामप्युपलक्षणानि भवन्तः अनुसन्धानार्थं प्रकाशयन्ति। परिभाषा, व्युत्पत्तिर्वाऽनुसन्धानस्य निखिलं प्रायोगिकं क्षेत्रं नावबोधयति, अत एव उपर्युक्ताः अनुसन्धानशब्दस्यार्थाः संक्षेपेणोपस्थापिताः सन्ति। परन्तु अस्ति महत्त्वमुनसन्धानपरिभाषाणां, पारिभाषिकशब्दानाञ्चानुसन्धानस्य, तस्मात्तत्रैवैषो हि लेखन-धाराऽत्र प्रवाह्यते-

(१) द एडवाँस्ड लर्नर्स डिक्सनरी ऑफ करेन्ट इंग्लिश (Th Advance Learner's Dictionary of Current English) कथयति यत् कस्याश्चिदपि विद्याशाखाय-मन्वेषणमाध्यमेन नूतनतत्त्वज्ञानाय यत् किञ्चिदप्यनुसंधीयते तदनुसन्धानम्''

(२) रेडमैन मोरीच

(Redman and mory) नूतनज्ञानावाप्तये व्यवस्थित-प्रयासमेव वयमनुसन्धानशब्देन व्यवहरामः (Systematised effort to gain new knowledge we call research")

(३) एकेषां मतानुसारं शोधः ज्ञाततत्त्वाधारेणा ज्ञातपदार्थावगमनम्। एतन्मतं न्या-वैशेषिक-शास्त्रयोरनुमानप्रमाणेनाधिगतस्यानुमिति-इति फलस्य प्राप्त्या सह संवादं स्थापयति - यत्र-यत्र धूमस्तत्र-तत्र वह्निरिति साहचर्यरूपव्याप्त्या ज्ञाततत्त्वेनमहानसगतेनाग्निज्ञानेन अज्ञातं पर्वतगतमग्निमपि अनुमानप्रमाणेनावधारयति पुरुषः।

(४) जिज्ञासाऽपि प्रेरयति अनुसन्धानकर्मणि तस्मात् एतत् सिध्यति यत् जिज्ञासोपशमनाय वैज्ञानिकदृष्ट्या तार्किक-चेष्टया च यत्किञ्चिदनुपलब्धं वस्त्वधिगम्यते तदप्यनुसन्धानतात्पर्यम् अर्थो वा भवति।

(५) क्लिफोर्ड वूडी (Clifford Woody) इति विदुषः मतमस्ति यदनुसन्धानस्यार्थो भवति समस्यायाः सम्यग्रूपेण परिभाषणम्, पुनः परिभाषणम्, तदर्थं चावकल्पनायाः निर्माणम्, तदर्थञ्चसूचनासामग्रीणां संचयनम्, व्यवस्थीकरणं, तत्परीक्षणम् - परिशीलनम्, तत्-भावार्थावगमनम् च।

(६) तथैव डीस्ले-स्लिंगर(D. Slesinger) एम् स्टीफेन्सन (M. stephenson) च विस्तारेणानुसन्धानस्यार्थं प्रस्तुवन्तौ भावं प्रकटयतः यत् कस्यचिदपि सिद्धान्तस्य सामान्यीकरणे कस्याश्चिदपि अवधारणायाः चिह्नादीनां परिशीलनं, विधाय ज्ञानोपयोगाय निश्चयी करणमेवानुसन्धानपदार्थः। एषभावो ह्यस्माकं साहित्यिकक्षेत्रे रससिद्धान्तस्य सामान्य-मनोविज्ञानदृष्ट्या यत्र परिशीलनं विधीयते, सामान्यीकरणम् च विधीयते तत्रैव निहितो दृश्यते।

अनेन प्रकारेण सामान्यतयैतद्वक्तुं शक्यते यत् येन वैज्ञानिकपरिशीलनमाध्यमेन, तार्किकदृष्ट्या च कस्मिंश्चित् ज्ञानेऽभिवर्धनं भवति यच्चलोक-सुखाय बौद्धिक विकासाय

च भवति तदेवानुसन्धानपदार्थः।

एतदेवतत्त्वमन्ये कथयन्ति यत् तदेवानुसन्धानतत्त्वं यत्रो द्देश्यपूर्णानुसन्धानं प्रति व्यवस्थितरूपेणाभिगमनं भवति। यद्यपि इमाः सर्वाः परिभाषाः वैज्ञानिकक्षेत्रीयानुसन्धानमेव सूचयन्ति तथापि सामान्याः परिभाषाः शोधस्य समान्यतया प्रबन्धनक्षेत्रीयानुन्धाने, साहित्यक्षेत्रीयानुसन्धाने अन्यत्र च प्रवर्तन्ते। तात्पर्यमिदमस्ति यत् अनुसन्धान-शब्दोऽपि सामान्य-विशेषार्थवाचको भवति, अस्य प्रायोगिकपक्षश्चास्माकं न्यायवैशेषिकदर्शनयोः वस्तुनः कार्यरूपे, परमाणुरूपे च स्वरूपद्वैविध्यमुक्तम्। यथा परमाणुस्तुसामान्य सर्वत्रैवसर्जनायां प्रवर्तितः, विशेषपरमाणुस्तु विशेषवस्तूत्पदानसन्दर्भे च प्रकल्पितस्तथैवास्यानुसन्धानस्याप्यर्थः धाराद्वयं प्रवाहयति। विज्ञान-कलाक्षेत्रयोः केचनानुसन्धानस्य विषयचयनादयो विषयाः सामान्यशोधप्रक्रियाधर्माः, भवन्ति परन्तु प्रयोगशालासाध्यानुसन्धानं प्रायशोविज्ञानक्षेत्रमेव व्यात्पनोति - इति विशेषः। तथैव लक्षणं, परिभाषा वा काचित् क्षेत्रविस्तारमिङ्गयति। येनोपर्युक्ताः परिभाषाः अर्था वा बहूनि क्षेत्राणि खल्वनुसन्धानस्य व्याप्नुवन्ति।

अर्थापनवैभिन्यञ्चानुसन्धान-शब्दस्य नानाविषयकानुसन्धानमेव सूचयति-न तु परस्पर-विरोधमिति भावः। उदाहरणं यथा - केचन कथयन्ति यत्समस्यासमाधानं येन वैज्ञानिकविधिना भवति तदनुसन्धानमिति चेदेषैकः प्रकारोऽस्त्यनुसन्धानस्य, तस्मान्नैतदवधार्यं यत्सैवार्थोऽनुसन्धानस्य परिपूर्ण इति। अतोऽनुसन्धानशब्दार्थस्य प्रवृत्तिनिमित्तानि बहूनिसन्ति येषां नियन्त्रीकरणम् अुनसन्धानस्य कस्मिंश्चिद् व्युत्पत्त्यर्थे परिभाषायाम् वा न भवितुमर्हति। मुख्यरूपेण निदानदृष्ट्या, कस्यचिद्वस्तुनः प्रकृतिज्ञानकरणदृष्ट्या, ज्ञाततत्त्वाधारेणाभिनवतत्त्वान्वेषणञ्च तार्किक-वैज्ञानिक-माध्यमेन यच्चिन्तनं प्रवहति तल्लक्षितञ्चफलमुपलभ्यते, तदेवानुसन्धानं शोधोवा वक्तुं शक्यते। फ्रेडरिक आस्टिन ऑग (Fredric Austin Ogg) महोदयः शोधस्य व्यापकस्वरूपमुपपादयन्नाह यत्केवलं शोध-कर्मणि साफल्यमेव मिलतीति न नियमः प्रत्युत् अनेन कर्मणा नूतनस्य ज्ञानस्यावाप्तिः, तत्र च परिवर्तनम् ज्ञानेपरिवर्द्धनमपि भवतीति।

यदि भारतीयप्राचीन-मनीषिणां शोध-दृष्टेरनुशीलनं क्रियेत तदा तु शोधस्य परिभाषापेक्षया प्रायोगिकः पक्षः बलवान् प्रतिभाति। तत्र विदुषां समवाये सम्प्रदाये सभायाञ्चाधुनिकतकनीकेराधुनिक-शोधोद्देश्यस्य चाभाव एव आसीत्। साधना-

प्रधानमनुसन्धानं प्राचीनाचार्याणामनुभवमूलकमेव फलमनुसन्धानस्यासीत् न तु साधनप्राधान्यमनुसन्धानमासीत् तेषां ऋषीणाञ्च। अस्योदाहरणं तेषां प्रोक्तेषूपदेशेषु शास्त्रेषु चोपलभ्यते-यस्यापलापोऽद्यापि केनचिज्जनेन कर्तुं न शक्यते। गन्धवतीपृथिवी इति यदुक्तं यस्यैतस्योल्लेखोऽथर्ववेदीयपृथिवीति सूक्तेऽपि विद्यते-तत्साधनाजन्यस्यानुसन्धानस्यैव फलं यस्य प्रभावो दृश्यतेऽवान्तरकालीनेऽपि साहित्ये। तथैव शारीरकशास्त्रस्यवेदान्तस्य जीवात्मपरमात्मनोः स्वरूपचिन्तनं ऋषीणामाद्यानां गम्भीरगवेषणफलमेव। शरीर विज्ञानभूतस्यौषधविज्ञानभूतस्यचायुर्वेदवृक्षायुर्वेद-शास्त्रयोरपि खलूपजीव्यत्वमन्येषां तत्सम्बद्धशास्त्राणां कृते यदस्ति तदप्यनुसन्धान मेव। तस्मात्परिभाषाकरणात्, अर्थापन-प्रपंचाच्च पूर्वत एव प्रायोगिकरूपेण नूतनतत्त्वानामाविष्करणं येन माध्यमेन प्रक्रियया वा भवन्नासीत्तदनुसन्धानमद्यतनीयायां भाषायां उच्यते।

शोधस्य पर्यायवाचिनः शब्दाः -

यद्यपि प्रतिपदमात्मनः विशेषमन्तर्भूतं रहस्यं तात्पर्यञ्चावधारयति, तथापि मुख्यशब्दस्य पर्यायवाचिनः शब्दाः मुख्यशब्देन सहातिशयरूपेण संवादं स्थापयन्त्येव। तत्रैव शोध-शब्दस्य पर्यायवाचिनः शब्दाः यद्यपि स्वस्वरूपं धारयन्ति, पदार्थञ्चापि प्रकटयन्ति तदनुसारं। तथापि कस्मिँश्चिदर्थे मुख्यशब्देन सह तात्पर्य-संवादं प्रकटयन्त्येव। अतोऽत्र 'शोधः' - इति पदस्य पर्यायवाचिनः अन्ये शब्दाः प्रस्तूयन्ते-

(१) अनुसन्धानम् :- सन्धानं(१) भवति द्वयोः वस्तुनोः बहूनां वा पदार्थानामव्यवस्थितानां व्यवस्थीकरणम्। तद्व्यवस्थायां या काचित् प्रक्रियास्वीक्रियते, प्रयासो वा विधीयते तद्भवत्यनुसन्धानम्।(२) अन्यत्र भवत्यर्थो लक्ष्यसाधनम्। यथाऽभिज्ञानशाकुन्तले कविकुलगुरुः कालिदासो निरूपयति वस्तु दुष्यन्तद्वारा **इति शरसन्धानं नाटयति**- इति। तथैव निम्नोन्नत-भावस्य पृथिव्याः वा निम्नोन्नतायाः समताविधानेऽप्येष शब्दः सन्धानमित्युज्यते- यथा तत्रैवाभिज्ञानशाकुन्तले - "**यदर्धेविच्छिन्नं भवति कृतसन्धानमिवतत्**"-१/९ अतः तदर्थं या विचारणा, व्यवस्था, सामग्रीसंकलनम्, तत्प्रयोगश्च वा भवति तदनुसन्धानमुच्यते। आधुनिक-शोध-सन्दर्भेऽपि संगति-दृष्ट्या प्रतिपादयितुं शक्यते यत् तथ्यप्राप्ति-हेतवे तत्वप्रतिपादनहेतवे च साहित्य-विज्ञान-कलादिविषयेषु या विचारणा क्रियते सप्रमाणं च तार्किकदृष्ट्या

पदार्थनिरूपणं क्रियते, प्रयोगशालायाञ्च वस्तुनः मूलप्रकृतेः ज्ञानाय निरीक्षणं, परीक्षणम् वा क्रियते वैज्ञानिकपद्धत्या तदनुसन्धानमुच्यते शोधशब्दस्थानापन्नम्। अस्य शोध-पर्यायवाचकपदस्य प्रायशो भवति प्रयोगः शोधार्थे।

(२) **अन्वेषणम्** - अन्वेक्षणशब्दोऽपि शोध-शब्दस्य पर्यायेऽर्थे गण्यते। यद्यपि शब्दोऽयं भौगोलिकानुसन्धानार्थं, कदाचिद्वैज्ञानिकानुसन्धानार्थ विशेषरूपेण प्रतिपादयति, तथापि गौणरूपेण साहित्य-क्षेत्रीय, समाजशास्त्रीया दिविषयकशोधकर्मणेऽपि शब्दोऽयं प्रयुज्यते। केषाञ्चिन्ममस्ति यत् अस्य अंग्रेजी-शब्दोऽस्ति डिस्कवरी (Discovery) उदाहरणानि खलु अन्वेषणस्य मन्यन्ते तैः कोलम्बसेनान्विष्टो[३] देशः अमेरिका, जेम्सवाटस्य रेलयान-इञ्जनम् - इत्यादि। एकेषां मतमिदमस्ति यदन्वेषण-शब्दः साहित्यिक[४] - सम्पदायाः संशोधन-विषये न प्रवर्तते। परन्त्वेषाधारणा न समीचीना प्रतिभाति - यतोहि साहित्यिक-क्षेत्रेऽपि सूक्ष्मनिरीक्षण -परिशीलनादि-व्यापारेण कस्यचिन्नूतनस्य पदार्थस्यावाप्तिर्भवत्येव। कश्चिदपि शब्दः पारिभाषिक-शब्दो वा प्रतीको भवति विशेष-पदार्थावगमनस्य। अतएव काव्यशास्त्रे साक्षात्संकेतिक-शब्दस्य व्यवहारोऽभिधासूचनायप्रयुक्तः।[५] अस्य तात्पर्यमिदमस्ति यत् विशेषोऽहि शब्दः विशिष्टपदार्थस्याकारात्मकं स्वरूपं संकेतयति यथा अस्मात्पदादयमर्थो बोधव्य इति ईश्वरसंकेतः शक्तिः।[६] तस्मात् तच्छब्दशक्त्यनुसारमेवमनिस पदार्थाकारो हि प्रादुर्भवति - इति। तस्मात् अन्वेषणशब्दोऽपि विद्यतेऽनुसन्धान-शब्दस्य पर्याय इति कथने न संकोचः।

गवेषणा - प्राचीनवैदिक-कालीने समाजे शब्दोऽयं गवामन्वेषणे प्रयुज्यते स्म इति एकेषां विदुषां मतम्। व्युत्पत्तिदृष्ट्या समालोचनेनास्य शब्दस्य तदेवार्थं साधयितुं शक्यते - तथा चात्रभावोऽस्ति - विलुप्त-वस्तुनः सूक्ष्म-तयाऽवलोकनम् - यथा गोपालकः गामन्वेष्टि वने। एतस्य शब्दस्यापि शोधार्थः भवितुमर्हति-यतोऽहि आधुनिक शोध-प्रविधौ बहुविधाः शोध-प्रकाराः मन्यन्ते। तत्र इतिहास-पुराणादिगतानां शब्द-संकेतमाध्यमेन भौगोलिक तथ्यान्वेषणमस्मिन् क्षेत्रे खल्वागच्छति-तत्र मन्ये, ऐतिहासिक-भौगोलिक-परिवर्तनेन शब्दसंकेतित-स्थलानामन्येषाञ्च पदार्थानां सम्यक्तयाऽन्वेषणम्, संशोधनं वा उदाहरणं भवति। यथा रामसेतुस्थलस्यान्वेषण-प्रसंगः। साहित्य-भाषा-संशोधनविषयेष्वप्ययं शब्दः स्वकीयां प्रवृत्तिं द्योतयति-तथापि सम्प्रतिशोध-पर्यापरूपेणास्य प्रयोगो न दृश्यते शोधसंस्थानेषु। अत एषः शब्दः स्वकीयं शोध-स्वरूपं

इदानीं त्यक्तवान् अस्तीति दृश्यते। क्वाचित्कएवास्य शोध-पत्रिका नामकरणे प्रयोगो दृश्यते- न सर्वसामान्यरूपेण।

उपर्युक्ताः शब्दाः संशोधनस्य पर्यायत्वेन ये प्रोक्ताः तेषां तात्पर्यमस्ति केनचिदपि माध्यमेन नूतनवस्तुनः संशोधनमाध्यमेनावाप्तिरेव। गवेषणा-सन्दर्भेऽपि तथैवास्ति। अर्थात् गोपालकेन क्वचिद्विलुप्तगोरन्वेषणप्रसंगेऽपि अटता तेन मार्गे कस्य चिन्नूतनस्य वस्तुनः प्राप्तिर्यदा जायते तदाऽस्य शब्दस्य शोध-पर्यायत्वेन ग्रहणं शक्यमस्ति।

तत्र चोपलब्धसाहित्यस्य परिशीलनेन, विस्तृत विवेचनेन गभीरालोचन-पद्धत्या वा तात्पर्यावगमनं मुख्यसन्देशस्य च या प्राप्तिर्भवति साप्येका-धाराऽनुसन्धानक्षेत्रस्याद्य प्रवहन्ती दृश्यते। तत्रानुसन्धानशब्द-पर्यायरूपेणाधो निरूपिताः शब्दा अपि गृह्यन्ते।

अनुशीलनम् - एष शब्दः प्रवर्तते अन्वेषणीये संशोधनीये वा साहित्यिक विषये। विशेषोद्दिष्ट - पदार्थप्रकृतिज्ञानस्य आधारेण नानाविषयदृष्ट्या, साहित्य-शास्त्रे कविहृदय-प्रकृतिज्ञानाय शब्दगत-शक्ति-सामर्थ्य-बलाद् यत्किञ्चिदपि चिन्तनं सप्रमाणं तार्किक-रूपेण-विधीयते; तदनुशीलनं समीक्षाया एकः प्रकारः, अनुसन्धान-शब्दपर्यायरूपेणावगन्तुं शक्यते। ''विज्ञातसारान्यतानुशीलनेन'' -इति भारवेः वचनेनापि तदेवभावोऽवगम्यते। कस्मिँश्चिदर्थेपरामर्शः विमर्शः परिशीलनादि शब्दा अपि कला विषयकानुसन्धानक्षेत्रमेव सूचयन्ति, तस्मादेतेऽपि शब्दा अनुसन्धान-शब्दपर्यायाः, शोध-पर्याया वा स्वीकर्तुं शक्यन्तेऽवस्थाविशेषस्य विशेष चिन्तनमननाध्ययन-सन्दर्भे, काव्यसौष्ठवस्य, ध्वनिविशेषस्य, भावनाविशेषस्य, तात्पर्यविशेषस्य च अवकलनाय साहित्य क्षेत्रेऽनुसन्धानसन्दर्भे च।

समीक्षा-शब्देकिञ्चिद्विशेषमस्ति। अत्र समीक्षासन्दर्भे सर्वतोभावेनानुसन्धेय विषयस्य प्रतीक-शब्दानां, चिन्तनंविधीयते, विशेषसन्देशावगमनाय च ताटस्थ्यभावेन अनुसन्धेयविषयस्याध्ययनं, मननं, चिन्तनं च विधीयते।

आलोचनाऽपि शोधविषयस्य शीर्षकस्थानीयः शब्दोविद्यते। आलोचनायाः प्रायः व्यावहारिकक्षेत्रे नकारात्मकं रूपं मन्यते परन्तु तस्य शब्दस्य व्युत्पत्त्यनुशीलनेन न तथाऽर्थमनुसन्धान-कर्मणि कर्तुं शक्यते। अनुशीलने, परिशीलने, समीक्षायामालोचने च सर्वत्रैव ताटस्थ्य-भावेन, तार्किकरूपेण, वैज्ञानिक-प्रकारेण चिन्तनं क्रियते विषयस्य। यद्यपि साक्षात् रूपेणात्र वैज्ञानिकदृष्टेः प्रतीतिः न भवतिः, परन्तु यदा

वैज्ञानिकसंसाधनानामुपयोगेन साहित्यसम्पदः परिशीलनं विधीयते तदाऽस्याः प्रतीतिर्भवति। आधुनिकानुसन्धानसंस्कृतौ सर्वत्रैवानुसन्धानतकनीकेः उपयोगात्, संसाधनानाञ्चप्रयोगात् समीक्षादिप्रकारा अपि खल्वनुसन्धानस्य वैज्ञानिका एव मन्यन्ते। उदाहरणार्थं यदि कविकुलगुरकालिदासविरचितस्य मेघदूतस्य समालोचनात्मकमध्ययनमुसन्धानदृष्ट्या विधीयेत-तदा मानवमनोविज्ञानपरीक्षण-साधनानामन्येषाञ्च वैज्ञानिकसंसाधनानामुपयोगः भविष्यत्येव। तस्मात्-समीक्षात्मकाध्ययने शास्त्रान्तरपदार्थसिद्धये वैज्ञानिकी दृष्टिस्तु भवत्येव।

अन्येचानुसन्धानार्थज्ञापकान् पर्यायान् वयं यथा जानीमो यदस्माकं प्राचीन-संस्कृत-भाषा-साहित्ये सर्वाः विद्या-शाखाः वैश्विक-शिक्षण-पारिभाषिकाश्च शब्दाः विराजमानाः सन्ति परन्तु तिलेषु तैलं यथा व्याप्तं दृश्यते, तत्कुट्टन-निश्च्योतन-माध्यमेन च प्रत्यक्षं उपस्थितं भवति, तद्वदेवास्माकं शास्त्राणि तिलस्थानीयानि सन्ति येषां विशेष-शास्त्रमन्थनधिया, परीक्षणं क्रियते तदाऽभीष्टमुपलभ्यते। अतः आधुनिकसंशोधनसूचना संवाहक-शब्देषु, डिस्कवरी इनवेन्सन, रिसर्चादयोऽपि शब्दाः यान्-यान् अर्थान् नीत्वा प्रवर्तिताः प्रतिभान्ति ते-तेऽर्था खलूपर्युल्लिखितेषु शोध-पर्यायेषूपलभ्यन्ते तथापि आङ्गलभाषीया अपि शोध-पर्यायवाचिनो हि शब्दा अत्र पाठकानां समक्षं सपरिशीलनं प्रस्तूयन्ते -

डिस्कवरी (Discovery) - डिस्कवरीति शब्दः ददाति सन्देशं तद्वस्त्वन्वेषणस्य, यस्योपरि विद्यते ह्यावरणम्। अस्य सूत्रं वेदान्त-शास्त्रस्यावरणशक्ति-विचारे प्राप्तुं शक्यते। "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः" इति वाक्यं स्पष्टं तदेवाङ्लभाषीयं डिस्कवरीति शब्दार्थं सूचयति। तत्र वेदान्त-शास्त्रेऽपि मायाया आवरण-शक्त्या वस्तुनः जीवात्मनः प्रकाशः तिरोहितो जायते। यदा ज्ञानेन तत्त्वमसीति महावाक्यस्य तात्पर्यज्ञानेन, तथा च "अहं ब्रह्मास्मि" - इति खल्वनुभववाक्येन साधकः स्वं-स्वं रूपमवधारयति तदा सर्वमावरणं निरस्तं भवति। डिस्कवरीति-नाम्नाख्योऽनुसन्धानेऽपि कस्यचिदपि दूरस्थस्य वस्तुनः भौगोलिकप्राकृतिक-वातावरणेन अन्येन केनचित् कारणेनावृतं स्वरूपमुद्धाट्यते। आध्यात्मिक-क्षेत्र-सम्बद्धमिव प्रतिभाति Discovery (डिस्कवरीति) पदम्ः, यस्य तात्पर्यमिदं भवति यत् केनचित् कारणेन स्थितमपि वस्तु सरलतयानावलोक्यते-परन्तु कञ्चित्संकेतं लक्षणं वा मनसि धृत्वा समुचित-साधनेन यदा तस्योद्धाटनं भवति तदस्ति डिस्कवरी-पदार्थ-फलम्।

आइनस्टीन-महोदयोपि तदेवसंकेतयति। परन्तु-तस्यसिद्धान्ते विशेषोऽस्ति यत् उपनिषदां भावानुसारं कस्यचिदपि पदार्थानुसन्धानेऽन्तः प्रज्ञैव कारणमस्ति-यथा "Einstein very emphatically pointed out that scintific laws may be deocovered only through intuition."(क) अतः इन्वेन्सन-शब्दोऽपि तथैवानुसन्धानस्य तात्पर्यं धत्ते यथा डिस्कवरीति पदं धारयति। किञ्चिद्विशेषमस्ति (Invention) इन्वेनसनपदे यदयं शब्दः साहित्यकलाक्षेत्रे कल्पना-प्रकारमपि खल्वनुसन्धानस्य परामृशति। अनेनप्रकारेणानुसन्धानतत्वार्थप्रतिनिधि-शब्दाअन्येऽपि 'एक्सप्लोरेसन(Exploration) इत्यादयः सन्ति येषां विश्लेषणेनानुसन्धानमेवार्थोऽवगम्यते। अतोऽवगम्यते यत् प्रत्येकं पर्यायपदमनुसन्धानस्य, शोधस्य वा शाखाविशेषं, प्रकारविशेषं चोंपगृह्यप्रवर्तितं प्रतिभाति। विशेष रूपेणाङ्ग्ल-शब्दाः शोधस्यपर्यायरूपाः डिस्करवरीत्यादयः आधुनिक भौतिक-रसायनादि-विज्ञानविभागस्यानुसन्धानाय प्रयुजयन्ते परन्तु शोधः, अनुसन्धानंम् च भाषा-साहित्य-समाजशास्त्रादिविषयक अनुसन्धानप्रसंगे प्रयुज्यते।

परन्तु तटस्थपरिशीलनेनं, स्वतत्र-चिन्तनेन च ज्ञायते यत् शोधस्यानुसन्धानस्य वा डिस्कवरीत्यादि शब्दानां वा लक्ष्यप्राप्रि-प्रक्रिया समाना एव, यतोऽहि विश्वस्मिन् प्रकृतिरेका एवास्ति तस्यैव व्यापकस्वरूपानुसन्धाने ज्ञान-विज्ञान-भाषा-साहित्य-मनोविज्ञानादि विभागेषु-प्रवर्तिताः नानाविध-शोधाः नानाभिधानैः संबोध्यन्ते। वस्तुतः तत्र सर्वत्रैव पारस्परिको(अ) हि सम्बन्धः प्रतिभाति। अस्यं स्पष्टीकरणं फ्रिट्जोफ कापरा(Fritzof capra) इति महतोवैज्ञानिकस्य पुस्तकानामध्ययनेन भवति-यथा-

"Problems must be seen as just different facets of one single crisis,

populated, globally interconnected world." The web of life pege -4"

अतः पारमार्थिक-रूपेणाथर्ववेदस्य पृथिवी-सूक्तं यथा केवलं देश विशेषस्य भूम्याः वर्णनं न करोति प्रत्युत् पृथिवी-सामान्य-तत्त्वस्यैववर्णनं करोति-तथैव शोधादि पर्याया अपि सर्वेसर्वार्थवाचकाः वर्तन्ते, तथापि वैशेष्यात्तद्वादस्तद्वाद्इति सिद्धान्तेन प्रवृत्तिर्भिद्यतेऽनुसान्धान-पर्यायवाचिनां पदानाम्' - इति।

शोध-स्वरूपम्

शोध-स्वरूपमित्यस्यार्थो मन्यते कतिपयाः घटक-पदार्थाः, ये शोध-कार्यमन्येभ्यः कार्येभ्यः, कर्मभ्यः, लेखनेभ्यश्च विशिनष्टि।[१] स्वरूपं प्रकृतिरुच्यते, स्वभावो वा। स्व-भावः क्रियाकलापः इति स्वीकरणे न दोषः। यद्यपि इतः पूर्ववर्तिनो विषयाः ये उपवर्णिताः सन्ति तेषामपि शोध-स्वरूपेऽन्वयोऽस्ति न तु केचन तेभ्यो भिन्नाः विषयाः अनुसन्धान शोधं वा निर्मान्ति तथापि खल्वस्मिन् प्रकरणे प्रतिपाद्योऽस्ति स्पष्टमनुसन्धानाकारः। अतोऽत्रैव विचारोऽस्ति केन्द्रितः। शोधः तदेव पदार्थो गण्यते शिक्षा-विशेष-क्षेत्रे यस्मिन्नधोलिखिताः विषयाः भवन्ति।

(अ) नूतनावधारणायाः स्थापना-

शोध-प्रबन्धे विवेचनीयविषयाणां सप्रमाणंपरिशीलनेन यदा शोधार्थिना काचिदभिनवावधारणा स्थाप्यते - तदा तच्छोध स्वरूपं धत्ते। उदाहरणान्यस्यसिद्धान्तस्य बहूनि भवितुमर्हन्तिज्ञान-विज्ञान-कला-दर्शन-समाज-शास्त्रीय-विषय-सम्बद्धानि तथाप्यत्र कतिचिदान्येवोदाहरणानि नूतनावधारणायाः विवेच्यन्ते। नूतनावधारणायाः तात्पर्यमिदमस्ति यत् प्राचीनसिद्धान्तानां ताटस्थ्यरीत्या, तार्किक-वैज्ञानिक-दृष्ट्या लोकोपकाराय मर्यादापूर्वकमनुशीलनम्। आधुनिक-युगे क्वाचितोऽस्य विषयस्य दुरुपयोगोऽपि दृश्यते वैभव-बलात्। उदाहरणं यथा क्वचिच्छोधप्रबन्ध निर्माणविषये साहित्यिक-ध्वनेः वर्णनप्रसंगे यदि कश्चित् संस्कृत-साहित्यस्य ध्वनि-स्वरूपेणापरिचितो भवन् काव्यसमीक्षण प्रसंगे कथयेत् यदत्र क्वचिदपि नूपुर-ध्वनिर्नदृश्यते-अतोऽत्र नास्ति ग्रन्थे ध्वनिरिति। एतद्दोषमपि नूतनसिद्धान्तस्थापनं मत्वा पाण्डित्यमात्मनः ख्यापनं नोचितम्। प्रत्युत् प्राचीनावधारणायां विचार-शैथिल्यस्य विशदीकरणं विधाय नूतनावधारणा यस्मिन् शोधकर्मणि भवति तच्छोधः कथ्यतेऽनुसन्धानं वा। यथा वेदान्त-शास्त्रस्य महावाक्यस्य, अनुभव-वाक्यस्य च परिष्करणे व्यष्टि-समष्ट्योः समीक्षणम्।[२] अत्र अहं ब्रह्मास्मीति उपनिषद्-वाक्यस्याविरुद्धं[३] गत्वैव तत्त्वार्थचिन्तनमुपनिषद्-सिद्धान्तस्य मर्यादायामेव वेदान्त-शास्त्रस्य यल्लक्ष्यं जीवब्रह्मैक्यसिद्धान्तस्थापनं तच्छात्रनूतनावधारणास्थापना। अस्यैव वैज्ञानिक-दृष्टेः प्रभावो लक्ष्यते खल्वाधुनिक विज्ञानानुसन्धानेऽपि यत्र समष्टि-रूपस्य, व्यष्टि-रूपस्य चाध्ययनमाध्यमेन प्रकृतेः जगतश्च रचनास्वरूपमवगम्य जगतः समस्यासमाधानस्योपायः चिन्त्यते।[४]

(२) सूचनासंकलनेन सर्जनाऽवधारणा -

कस्यचिदपि शोध-कार्यस्य कृते प्राप्त-दृष्ट-पदार्थानां प्रकृति-वैशिष्ट्यं तैषाञ्चावयवानां स्वरूपज्ञानं, अवयव-अवयविनां पारस्परिक-क्रिया-प्रतिक्रियाणां ज्ञानञ्च प्राप्य तदाधारेण परिकल्पनायाः योजना क्रियते।[५] तदर्थञ्च नानाविधानां विषयसम्बद्धानां सूचना-संकलनमावशकयकं भवति। तत्प्रमाणयुतञ्च साक्ष्य-संकलनमपि भवति। परन्तु अत्रावधेयमस्ति यत् विभिन्न-प्रकारक-संकलित-सूचनानां विश्लेषणं तेभ्यः संकलितेभ्यः पदार्थेम्यः नूतनस्य कस्यचिद्वस्तुनः सर्जनायै[६] भवति। उपर्युक्ताः संकलिताः सूचनाः सामग्रयश्च मुख्यसाधनभूताः शोध-विषयस्य भवन्ति याः विना शोधकार्यं नाग्रे प्रसरेत प्रसुतमपि न किञ्चिद्वस्तु नूतनं जनयेत्। अतः सूचनासंकलनं; नूतनवस्तु-सर्जनं येनमाध्यमेन करोति तदेव पुष्णाति शोध स्वरूपम्। उदाहरणं यथा संस्कृत-साहित्य-क्षेत्रे रस-सिद्धान्तविश्लेषणात्मशोध-प्रसंगे, शास्त्रगताः ये मनोवैज्ञानिक-विचाराः उपलब्धाः सन्ति तेषां मनोभावनायाः सामान्यीकरण[७]- दृष्ट्या परिशीलनेन कस्मिँस्वि निर्णये गमनादिकम्। अस्मादेव कारणात् शंकुकादीनां-रसचिन्तन-पारावारीणानां नानाविधानि मतानि समागतानि तथैव च पाश्चात्य काव्यशास्त्रे कैथार्सिस् (Catharsis)[८] इति सिद्धान्तस्य चाविर्भावः। एषा प्रक्रिया शोधस्यस्वरूप प्रतिपादिनी यद्यपि सर्वविधशोधेषु न प्रवर्तते तथापि वैज्ञानिक-सामाजिक-प्रबन्धादि-शोधकार्यापेक्षया कला-साहित्य-मनोविज्ञान-विषयक-शोधक्षेत्रेषु च प्रवर्तत एव। उदाहरणार्थं गुरुत्वाकर्षणस्य सिद्धान्तस्थापनाय यद्यपि न तथा सहायकसामग्रीणां संकलनमपेक्षितमासीत् - तथापि बहुविध वैज्ञानिक-शोधेषु दृष्ट-प्राकृतिक-पदार्थानां परिशीलनाय तेषां संकलनं तु भवत्येव।

अतः यथाद्यदृश्यते येन-केनचित् उपायेन स्व-सिद्धान्तस्य परिपोषणाय शोधकर्मणि सूचना-नाम्ना कस्यचिदुदाहरणस्योल्लेखो विधीयते शोधार्थिभिः - येनोदाहरणं विलोक्य दृष्टिः परीक्षकस्य पाठकस्य च विश्वस्ता जायेत - तत्र सम्यक् तदुदाहरणानां मननं, परिशीलनं, अर्थावगमनपूर्वकं तस्य प्रासंगिकउपयोगो हि प्रायशः न दृश्यते - व्यावसायिक-शिक्षादृष्टेः गुणात्मक स्वरूपस्य ज्ञानविहीनजनेषु - येन शोध-कार्यस्य विशेषोपलब्धिज्ञाने काठिन्यमनुभूयते-स्वयं शोधार्थ्यपि तदुद्देश्ये शोधकार्योपलब्धेः विषये च भ्रमितोदृश्यते। अतः यस्मिञ्छोधकर्मणि सूचनानां[९] संकलनं नूतनवस्तुपलब्धये भवति तद्भवति हि शोधस्य सामान्यं स्वरूपम्।

(क) नियन्त्रित-भाषाः -

सैव शोध-प्रबन्ध शोध-स्वरूपं धत्ते यस्मिन् खल्वनुसन्धानस्य भाषा पाण्डित्योपेता, अस्पष्टा, आलंकारिकी[१०] श्लेषोपेता, क्लिष्टा, अनावश्यक-पारिभाषिक-शब्दोपेता च न स्यात्। प्राञ्जलभाषाऽपि क्वाचित्की भावानुगामिनि च स्यात्। उपन्यासस्य, गद्यसाहित्यस्य वाऽनुप्रासविशिष्टा, केवलं श्रवणसुभगा न स्यात्। भाषा परिशुद्धा, विषयप्रतिपादनयोग्या, सहजा, सरला च स्यात्। एतदत्रावधेयमस्ति यत् विशिष्टपारिभाषिक शब्द-योजनेन प्रतिपाद्य-पदार्थस्य भावाभिगमने काठिन्यमुपजायते। यथा समान्य-संस्कृत-भाषायां "चत्वारः" इति संख्या-ख्यापनाय ज्योतिष-शास्त्रीयं "वेदः" इति पदं अन्यं वा तद्वत् किञ्चित् पदं प्रयुज्यते तदा सौष्ठवाय शोध-ग्रन्थस्य कृते न भवति। यतो हि भाषा-पाण्डित्य-प्रदर्शनं एव शोधार्थिन आयासो भविष्यति चेद्वस्तुनः प्रतिपाद्यस्य स्फोरणे समुचितं मननं चिन्तनं वा न भविष्यति। यद्यपि शास्त्रविशेष-सन्दर्भे नियमोऽयं शैथिल्यं याति यथा न्याय वैशेषिक-वेदान्त-व्याकरण-दर्शनविषयक-शोधेषु तथैव यद्यावश्यकरूपेण पारिभाषिक-शब्दानां प्रयोगः कर्तव्यो भवतिः, तदा तेषां सरल-भाषायां भावार्थः टिप्पण्यां देयो भवति। एतदवगम्यैव भाषायाः विनियोगो हि शोध-प्रबन्ध-लेखने विधेयः, यद्गृहीतविषयस्य, अनुसन्धेय विषयस्यवाधिकृतो ज्ञातशोधार्थी वर्तते-स एव तात्पर्यविदस्ति विषयविशेषस्य, तत्प्रयुक्त-पारिभाषिक-पदानाञ्च। एतस्यशोध-गत-प्रतिपादितविषयस्य परार्थावगमनायापि[११] स एवाधिकृतः। तस्मात् उपयुक्ता भाषा, बहुजनबोध्या एव प्रयोक्तव्या।

विषय-व्याख्यानावसरे शब्द-मर्यादाया अपि ज्ञानमावश्यकमस्ति। तदर्थं जातेसन्देहे कोशादिग्रन्थाः[१२] सम्यक्तया द्रष्टव्याः, मार्गनिर्देशकोऽपि प्रष्टव्यः। यथार्थावस्थापनयोग्या भाषा एव प्रयोक्तव्या। शोध-प्रलेखे संयमो विधेयः क्वचित् क्लिष्टा, क्वचिच्चात्यन्तमेव सरला, क्वचित् विशेष-पारिभाषिकाः शब्दाः, क्वचिच्च पारिभाषिक-शब्दविहीनाः, क्वचिद्ग्राम्या एव, क्वचिच्चोच्चस्तरीया एव भाषा न प्रस्तोतव्या, शोध-विषयप्रतिपादनाय-प्रत्युत् नियन्त्रित-भाषा एव प्रयोक्तव्या। यत्र प्रयुक्ता भवति नियन्त्रिता-भाषा, स्तरीया च भाषाऽनुसन्धानस्य तदेव शोध-स्वरूपं गृह्णाति।

(ङ) शोधोद्देश्यस्य स्पष्टता, सीमानिर्धारणञ्च -

यस्मिन्-शोधकर्मणि, तस्यशोधस्य[१३] प्रारूपे चोद्देश्यस्य स्पष्टोल्लेखो भवति तदेव-

शोध-स्वरूपं धत्ते। अस्पष्टोद्देश्येन प्रवर्तितं शोध-कार्यं भ्रमोत्पादकं, स्तर विहीनश्च भवति। उद्देश्यञ्च शोध-प्रायोजना-प्रारूप-निर्माण-काल एव बुद्धया शोधार्थिनो जायते। आशोध-कर्म तन्न विस्मर्तव्यम्। कदाचिल्लेखन-काले (विशेषरूपेण संस्कृत साहित्यस्य काव्यादिक्षेत्रीयानुसन्धनप्रसंगे) भावना-प्रवाहो शोधार्थिनं वस्तु-तत्त्वादन्यत्रनयति-तस्मिन्-काले विस्मरति शोधार्थी यत् किमस्ति तस्य शोधस्य मूलमुद्देश्यमिति। तथैव भावनाप्रवाहनियन्त्रणाभावे च-सीमाऽपि शोधकार्यस्य ज्ञाता न भवति। अतिक्रामति च शोधार्थी शोध-विषयम्। तात्पर्यमिदमस्ति यत् शास्त्रीयविषयाः परस्परं सम्बद्धा प्रायशो भवन्ति। अतः विषयातिक्रमणावसरः समक्षं नृत्यति सर्वदैव शोधार्थिनः। यद्यपि शोध-प्रारूपनिर्माणावसरे सर्वं तत्र शोध-प्रारूपे निर्धारितं भवति-तथापि लेखनकालेऽनवधानता-वशादेतत्कदाचिन्नभवेदितिहेतोः तस्य स्मरणं स्वदैव कर्तव्यम्। यथा न्याय-वैशेषिकाणां उपमान-प्रमाणेऽतिदेश-वाक्यस्मरणमावश्यकं भवति-न चेत् सादृश्याधारेण संज्ञा-संज्ञीत्यनयोः सम्बन्धस्थापनं न स्यात् तथैव सीमा-स्मरणं विना शोध-कार्यलेखनमपि समुचितं न स्यादतो हेतोः हि शोधोद्देश्यस्पष्टीकरणं सीमा-निर्धारणञ्च शोध-स्वरूपायावश्यके स्तः।

(इ) वर्णित-विषयेषु उत्तरोत्तर रुचिकरः प्रभावः -

प्रायशः कला-साहित्य-शोध-क्षेत्रे, शोध-प्रारूपे विषयाः अध्यायेषु प्रकरणेषु, उपप्रकरणादिषु च विभक्ताः दृश्यन्ते। अतः एकस्य प्रकरणस्य विषय-वस्तु-वर्णनानन्तरं तत्संवादेनैवाग्रिम-प्रकारणानां(१४) समुचित योजना यस्मिन् शोध-प्रबन्धे भवति-येन पाठकस्याभिरुचिरुपवर्धेत-तदस्ति शोधस्य सामान्यं स्वरूपम्। एतस्य विषयस्यावहेलना न विधेया। प्रयासो विधेयः यत्प्रकरणानुसारं वर्णितेषु विषयेषु रोचकता-प्रभावो भवेद्येन पाठकाः तं शोधं प्रति पठनायोत्सुकाः भवेयुः। तथा च सर्वेषु प्रकरणेषु स्वतंत्रसमीक्षायाः दर्शनं शोधार्थिनश्च मौलिकदृष्टेः निदर्शनं भवेद्येनावान्तरकालीन शोधार्थिनां कृतेऽपि मार्ग-दृष्टिः संभवेत्। समाधेय-समस्योत्थापनं यथा प्रारंभे शोध-कार्यस्य शोधशीर्षके, प्रारूप-प्रपत्रे च लक्ष्यते तस्य क्रमशः समाधान-श्रृंखलायाः निदर्शनमपि शोध-सामान्यस्वरूपेऽन्वेति। उदाहरणार्थं यदिकस्यचित्कवेः कृति-समीक्षणं शोधकार्यस्य परमं प्रयोजनमस्ति तदा तस्य कृतिना सह तस्य कवेः जीवन-मूल्यमपि यथा भवेत्-प्रस्तोतव्यं तथा विधेयम्। तयोः हि एतन्मन्यते यत् कस्याश्चिदपि(१५) साहित्यिक-रचनायाः मूले

कस्यचित्कवेः सामाजिक-मूल्यं, व्यक्तिगत-भावना, तात्कालिकी वातावरणञ्च दृश्यन्ते। यदा कश्चिच्छोधार्थी तत्प्रतिपादेनेन सह प्रवृत्तो भवति तदाऽभिरुचिं जनयति पाठक-जने, अथवा शोध-प्रबन्धमपि तस्यशोधार्थिनः शोध-स्वरूपानुकूलं मन्वते मनीषिणः। अस्मिन् प्रसंगे शोधार्थी समीक्षात्मकाध्ययनात् पूर्वं याथातथ्यरूपेण तत्कवेः जीवनवृत्तान्त मुपवर्णयित् - येनान्येषां शोधार्थिनामपि कृते-प्रेरणायाः विषयो भवेत्। कवेः आदर्श-भावनायाः विकटपरिस्थितेः सकारात्मक-प्रभावो भवेज्जनेषु। उदाहरणार्थं कालिदासस्य काव्य-समीक्षणावसरे[१६], बाणभट्टस्य वा काव्यसमीक्षणावसरे तयोः जीवनवृत्तान्तस्य प्रकाशः स्वयमेव सन्देशप्रवाहको भविष्यति तथा च काव्यतत्त्वविश्लेषणप्रसंगे स सन्देशः दीपवत् कार्यं करिष्यति-कदाचिच्छोधार्थिनः समीक्षणदृष्टिमपि शोधयिष्यति-तत्राभिरुचिमुत्पाद्य। तथैव यदि कश्चिच्छोधार्थी माननीयानां पूर्वराष्ट्रपति ए. पी. जे. अब्दुलकलाम महोदयानां कृतित्वप्रसंगे शोधं चिकीर्षति तदा तेषां जीवन-वृत्तान्तानां, शोध-कार्यस्याद्याऽध्यायेषयदि वर्णनं विधत्ते- ततश्च क्रमशः शोध-प्रारूपानुसारं प्रवर्तते वर्णनं कर्तुं तदा तन्महद्रुचिकरं भविष्यति। अनेनैव प्रकारेण पाश्चात्य-साहित्यकारेषु सेक्सपीयर-महोदयस्य कृतित्व-समीक्षण-प्रसंगे शेक्सपीयर-महोदयस्य जीवन-वृत्तान्तस्य[१७] वर्णनं शोध-प्रबन्धस्य प्रारम्भिमकावस्थायामेव क्रियते ततश्च शोध-प्रायोजनानुसारं प्रवर्ततेऽग्रेकश्चित् शोधार्थी तदा विषयवर्णनेऽभिरुचिः समुत्पद्यते तस्मै शोधार्थिनेऽपि।

(ई) स्पष्ट सन्देशः

यस्मिन् शोध-प्रबन्धे विवेचित-विषयाणां सारत्वेन स्पष्टः सन्देशः[१८] प्रतीयते तदनुसन्धानात्मकमाकारं लभते। तात्पर्यमिदमसित यत् अनुसन्धानं यस्मात्-प्रकरणात् प्रारभ्यते यत्र च समाप्यते-तयोरन्तर्वर्तिविषयाणां विवेचनायाः फलं शोधार्थिनः दृष्टौ किं भवितव्यम् इति उल्लेखः स्पष्टः कर्तव्यः। तथैवात्रप्रसंगे शोधार्थिनः इच्छाशक्तेः ज्ञानशक्तेः, विवेचन-कौशल्यस्य प्रतिपादन योग्यतायाश्च संकेतो गृह्यते। कला-साहित्य-क्षेत्रीयानुसन्धाने विषयोऽयं महत्त्वमावहति-यत्राद्यतनीयानामनुसन्धातॄणां दृष्टि-पातो हि प्रायशो न दृश्यते। परन्त्वत्रावधानताऽप्यावश्यकी भवति। अवधानता चेयमस्ति यदतिशयरूपेणाश्वस्तो विश्वस्तश्च शोधकार्यं प्रति स न स्यात्। एतन्नोल्लेख्यं यदहं यत्किञ्चित्चिन्तितवानस्मि लिखितवान् वाऽस्मि तदेव सत्यम्। एतन्मन्मतानुसारमस्ति इति

लेख्यम्। तत्रैवैष:संकेतोऽपि निर्देश्य: यदेतेविषया एवास्मिन् सन्दर्भे प्रतिपादिता-इयत्येवास्य शोध-कार्यस्य सीमाऽस्ति-ततोऽग्रेऽस्मिन् विषये शोधकार्यं कर्तुं शक्यते-विषय-व्यापकत्वात्। शोधकार्यं एका सतत्[१९] प्रक्रिया भवति ज्ञानस्य, यत्र[२०] प्राचीनज्ञानधारायाः समावेशः, विकासः तथा च सम्भावितशोधाय साधनानि भवन्ति। अतः एतानि वस्तूनि यस्मिन् शोध-कार्ये भवन्ति तदेवाकारं गृह्णाति शोधस्यानुसन्धानस्य वा।

(उ) शोध-प्रक्रियानुसरणं व्यस्थितक्रमः विषयाणां तथा च समुचित-स्थलेषूपयुक्त विषयाणां विवेचनम्। :-

बहवोजनाः शोधकर्मणि प्रवृत्तेः पूर्वं शोध-प्रक्रियया परिचिता न भवन्ति - यस्मात् कारणात् ते सर्वदैव भ्रमे तिष्ठन्ति यच्छोधप्रबन्धस्य, अथवा अन्यत्र-शोधकार्यस्य प्रारम्भिकावस्थायां केषां विषयाणामुल्लेखः कथं कर्तव्यः ? कस्मिन् विषये कियद्बलं दातव्यम्, तदर्थश्च मौलिक-ग्रन्थाः के-के द्रष्टव्याः, समीक्षात्मकग्रन्थाश्च के द्रष्टव्येति-न जानन्ति। अतः शोध-प्रबन्धनिर्मितौ उपर्युक्तानां पदार्थानां समयक् ज्ञानाय कश्चिच्छोधप्रक्रिया-ग्रन्थः अवश्यमेवाध्येतव्यः; येन निर्मित-शोधप्रबन्धेपाठकः तस्यग्रन्थस्य शोधार्थिनाप्रतिपादितविषयधारामवलोक्य सहजतया तच्छोधप्रबन्धत्वेनाङ्गी कुर्यात्। **शोध-कार्यसम्पादन-साधनानां सम्युगपयोगस्य स्थले-स्थले निर्देशः**

अद्य शोध-प्रक्रियाऽत्यन्तमेव वैज्ञानिकी[२१] दृश्यते। तत्र केचन-नियमाः अनुसन्धानस्य सामान्यीकृताः केचन च खलुविषयानुसारिणः विशिष्टाः भवन्ति। परन्तु सर्वत्रैव शोध-कार्य सम्पादनाय बहुविधानिसर्वेक्षणादि-साधनानि भवन्त्यत्यावश्यकानि; येषां निदर्शनं शोध-प्रबन्धस्य स्थले-स्थले करणीयम्। उदाहरणार्थम् कस्यचित्-संस्कृत-काव्यस्य सम्पादनात्मकशोध-प्रबन्धे, सूचनानां प्राप्तये, तत्पाठशुद्धये विशेष-स्थल-समीक्षण-सन्दर्भे ये उपायाः, साधनानि च प्राप्तानि शोधार्थिना, तत्र सन्दिग्धस्थलस्य शुद्धये यस्यसाधनस्योपयोगः कृतः - तद्ग्रन्थस्य सम्पूर्णो हि सन्दर्भः टिप्पण्यां प्रस्तोतव्यः। परन्तु तत्तत्-सन्दर्भाणां विश्लेषणपूर्वकमेवोल्लेखो विधेयः यस्मिन् विषयेऽग्रे चिन्तनं भविष्यति सविशेषम्ः, परन्तु तत्रावधानताऽवश्यमेवविधेयाः यत् कस्यचित् समीक्षकस्योद्धृतं वाक्यं सप्रमाणं देयम्, परीक्षणपूर्वकञ्च। तथैव तस्य वाक्यं शोधार्थिन वाक्यं न भवेदिति प्रयतितव्यम्। एतच्चौर्यं मन्यते-तत्रदण्डस्य प्रवृत्तिरपि संभवाऽस्ति।

उपर्युक्तानां विषयाणामाधारेणैव कस्यचिल्लिखितकार्यस्य, परीक्षण-परिणामभूतस्य चानुसन्धानस्वरूपं कल्प्यते यत्रैकेषां मते कारणानाम्[२२] नियमानाम्, नवीन विचाराणाञ्चान्येषामपि खल्वाधारेण वर्णनं प्रस्तुतं दृश्यते। वास्तविक-रूपेणानुसन्धानस्य स्वरूपचिन्तने, पाठालोचनक्षेत्रे च बहवो विषयाः अनुस्यूताः दृश्यन्ते। केचनानुसन्धानस्य परिभाषा-परिकल्पनमेवानुसन्धान-स्वरूपमन्वते-केचन पुनः शोधार्थमेव मन्वतेऽनुसन्धान स्वरूपम्। परन्तु शोधे सर्वेऽपीमे विषयाः स्पृष्टाः भवन्त्येव। अनुसन्धाने मुख्य रूपेण निम्नलिखिता अवयवाः भवन्ति येषां विस्तार-पूर्वकं वर्णनं विद्वद्भिः विहितमस्तियेनानुसन्धानस्यव्यापकस्वरूपचिन्तनं तु भवति परन्तु कुतः प्रभृति कियत्पर्यन्तमनुसन्धानम् भवतीत्यवकलने काठिन्यमुपजायते। तथापि सामान्य दृष्ट्या त्रस्पष्टीकरणाय प्रायसोऽत्र विधीयते -

अनुसन्धानम् (क्षेत्रविस्तारः)

(१) क्षेत्राणिः-
- (अ) विज्ञानक्षेत्रे
  - भौतिक वि०
  - रसायन वि०
  - चिकित्सावि०
- (ब) प्रबन्धनक्षेत्रे
  - व्यक्तिप्रबन्धने
  - जीवनप्रबन्धने
  - सामाजिक-प्रबन्धने
- (क) कलाक्षेत्रे
  - साहित्यकलाक्षेत्रे
  - शिल्पादिकलाक्षेत्रे
- (ड) भाषाक्षेत्रे - भाषाविज्ञानक्षेत्रे वा
  - ध्वनिक्षेत्रे
  - लिपिक्षेत्रे
  - भाषा-विकास, भाषापरिवर्तनादि विषये च।

अनुसन्धान-स्वरूप-घटकपदार्थाः

(१) विषयज्ञानम्

(२) शोधप्रक्रियानुरूपचिन्तनम्

(३) शोधकर्यस्यपूर्वापरव्यवस्था चिन्तनम्

(४) प्रकरणानुसारं विषयविवेचनम्

(५) सन्दर्भ-परिशीलनम्, उल्लेखश्च

(६) मौलिकचिन्तनम्

(७) वैज्ञानिकी, तार्किकी च दृष्टिः

(८) शोधार्थिन आत्मतुष्टिः

(९) अभिकल्पनायाः सप्रमाणपुष्टिः

(१०) सन्दर्भ-ग्रन्थसूची:

शोधोद्देश्यम्

संशोधन नाम किञ्चिन्नूतनज्ञानाविष्करणम्। तदेव शोधस्य यद्यपि मुख्यं लक्ष्यं भवति कस्यचिदपि शोधार्थिनः। शोध-प्रविधिविषये चिन्तकानां, तदविषया लोचकाना ञ्च मतानुसारमनुसन्धानस्योद्वेश्यं केनचिदपिशो धार्थिना निश्चेतु न शक्यते-यतो हि प्रवृत्तिरेषोत्कृष्टायाः शिक्षायाः विषय भेदात्, सीमाभेदात् बुद्धि-स्तर-भेदात्, व्यवसाय-बाहुल्यात्, अध्यवसायस्तरप्रधानाच्च नाना-धारामवाप्य प्रवर्तते। तथापि केचन-विषयाः शोधविषयप्रवर्तनायां सोधोद्वेश्य-निर्धारणायावश्यमेव ध्यातव्याः भवन्ति। तस्मादत्र किञ्चिद्विचार्यते तस्मिन् विषये। शोधोद्वेश्यञ्च भिद्यते शोधार्थि-विशेषात्। तस्य मानसिक-संस्कृति कारणाच्च। प्रायशः "इतरेतर जन्मानः इतरेतरप्रकृतयः" -इति भणितिं मतावधार्य जीवनलक्ष्यं शोधार्थिनः निश्चयति शोध-कर्मप्रवृत्तिश्च। अतो हेतो व्यापके समुद्रे शोधाद्देश्य-स्य नियमनमत्यन्तमेव कष्टकरमस्ति, तथापि लोकेदृष्टोद्देश्यानां जनानां सर्वेक्षणाधारेण विचारकाः शोधोद्वेश्यानि निरूपयन्तो दृश्यन्ते येषामुपवर्णनमत्र विधीयते

(१) नूतनवस्तूपलब्धिः[१]-

संसारे पाञ्चभौतिकाः पदार्था उपस्थिताः सन्ति निखिलं हि जीवनं जीवानां तेषामेवाधारेणप्रचलदस्तीति सत्यम्। तत्र चैतन्यं एकं स्वतंत्रं सात्विकञ्च तत्त्वं प्राणिनां मस्तिष्के नित्यं निवसति। अपरेण शब्देनैतत्प्रोक्तुं शक्यते यत्तदेव तत्वंजीवयति प्राणिनः। तत्र मन्ये द्वावंशो भवतः - (।) बाह्य वातावरणेन[२] सम्बद्धः, अपरश्च स्वतंत्रो ह्याध्यात्मिकः अलौकिकः अस्पृष्टश्च बाह्य- वातावरणेन। अतः द्वयोरप्यंशयोः चिन्तनशक्तिः स्वाभाविकि भवति। तस्मादेव कारणात् भौतिक-जीवनसम्बद्धं चैतन्यं भौतिक-विज्ञाने विहरदनुदिनं सहजतया तस्मिन्नेव विषये चिन्तयति - जिज्ञासते च वैविध्यहेतुं पदार्थानाम्, कदाचित्परमाणोरप्यन्वेषणं ऋषिभिः आधुनिक-वैज्ञानिकैश्च तत्फलमेव स्यात्। तत्राधुनिक-वैज्ञानिक-समयेऽपि खल्वन्वेषणस्य द्विविधा वधारणाऽस्ति-वस्तुसंघटनायाः स्वरूपज्ञाने तत्रस्थितानां परमाण्वादीनां वस्तुनिर्माणे पारस्परिकसम्बद्ध ज्ञानस्य विश्लेषणम्, (२) कस्यचिदपि[३] पदार्थस्यान्तिमभागस्य परिशीलनम् च। अस्मिन् सन्दर्भे प्राचीना ऋषय कणादयः आधुनिक-वैज्ञानिकाश्च स्व-स्व-भाषायां नातिभिन्नं मतमभिव्यञ्जयन्ति। परश्चाध्यात्मिकप्रज्ञांशः अप्रभावित सन् प्रकृतेः अदृष्टं पदं स्प्रष्टुं प्रेरयति सामाजिकान् धर्मादिसाधनेन। अतएवोक्तमुपनिषदि-**"आत्मा वा अरे द्रष्टव्यः"**-इति आधुनिक-शोध-प्रवृत्तावपि अवधारणाऽनुसन्धानस्य

उद्देश्यश्चसम्यक्-शोधस्य तद्वदेव जीवति भाषान्तरेण। आधुनिकविज्ञान-क्षेत्रेऽपि कस्यचिदपिवस्तुनः प्रकृतिज्ञानाय लक्ष्यानुसारं तस्यान्तः प्रदेशस्याध्ययनं परिशीलनञ्च विधीयते ''जीन्स'' वैक्टिरिया, सैल्स-प्रभृति[४] पारिभाषिकाः शब्दा अपि खल्वाधुनिक-विज्ञान-क्षेत्रेऽनुसन्धानस्यैवोपलब्धयः सन्ति। अनेनप्रकारेणैव प्रबन्धनस्य[५] विविधेषु क्षेत्रेषु, कलादिक्षेत्रेषु, सामाजिक-क्षेत्रेषु चानुसन्धानप्रवृत्तयः याः सन्ति तासाम् तद्-तद्-विषयक-समस्यानां मूलकारणमवगम्य समाधानाविष्करणमेवोद्देश्यमस्ति।

(३) **ज्ञानविकासः - ''सत्यं ज्ञानमनन्तं ब्रह्म''** - इति वाक्यं ज्ञानस्य शाश्वतिकं रूपं ब्रह्मरूपञ्च स्पष्टं प्रतिपादयत् सत्यस्य सम्बन्धं ज्ञानेन, ब्रह्मणा च निर्दिशति। अत्र सत्यस्य विकासः ज्ञानरूपं भवति - तस्य च पुनः ब्रह्मरूपत्वम्। अर्थात् ब्रह्मा, सर्जनकलाकुशलो मन्यते। तथैव च शोध-कर्म-माध्यमेन प्राप्तं यज्ज्ञानं तज्जनयति नूत्नं वस्तु, तदेव विकासो भवति ज्ञानक्षेत्रेऽनुसन्धानस्य। उदाहरणं यथा कस्यचिदपि वस्तुनः स्वरूप-ज्ञानानन्तरं तद्गत-क्रिया-प्रतिक्रियावबोधेन, सम-विषमावस्थोत्पादनेन चोपयोगः तस्य लोककल्याणाय क्रियते। अनेन प्रकारेण ज्ञातवस्तुनः नियतगुणधर्मज्ञानानन्तरमन्योऽपि गुणः शोधार्थिनः प्रज्ञया प्रकटी भवति। ज्ञानञ्च तस्य विस्तृतं भवति। अनयैवरीत्या ज्ञानेन, ज्ञान विकासस्य सिद्धान्तो भवति सिद्धः; तदुद्दिश्यैव शोधार्थी प्रवर्तते शोध-कर्मणि अनयैवाव धारया, कस्यचित् नियतवस्तुनः गुणधर्मज्ञानेन परस्यापि वस्तुनः गुणधर्माः (प्रतिक्रियाज्ञानार्थं) विशेषलाभाय प्रयोगशालायां सम्बध्यन्ते। उदाहरणं यथा निम्ब-पादपस्यसर्वरोगनिवारकत्वं यन्मन्यते तन्निम्बरसस्यान्यपादपरसेनसह योगस्थापनेन को नूतनो गुणः समुत्पद्यते-इति निम्बगुणधर्मज्ञानानन्तरं, परस्य च पादपस्यगुणधर्माव-बोधानन्तरमेव उभयो रसयोपरस्परमिश्रणेन प्रतिक्रिया विज्ञाता भवति। विज्ञानक्षेत्रीयमेतदनुसन्धानं न केवलं तद्विज्ञानक्षेत्र एव प्रवर्तते-प्रत्युत् तद्सिद्धान्तः स्वल्प भेदेन सहान्यत्रानुसन्धानविषयेऽपि प्रवर्तते। यथा काव्यशास्त्रीयानुसन्धाने कस्यचित्कवेर्भावनापरिशीलनविषये तस्य कवेः प्रयुक्त-पद-वाक्य-परिशीलनं मनोवैज्ञानिकरीत्या विधीयतेऽनुसन्धानविधौ, केनचिच्छोधार्थिना तदा तस्य च मनोवैज्ञानिकत्वंसाध्यते तेन अनेन प्रकारेण कस्यचिद्वस्तुनः मौलिक-तत्त्वावगमनाय तत्र कार्य-कारण भावनापरिशीलनात्मकमध्ययनं विधीयते अतः अत्र ज्ञानस्यैव परिवर्धनम् विकासो वा उद्देश्यं मन्यते शोधकर्मणि।

(३) समस्यासमाधानम् -

शोधस्योद्देश्येष्वन्यतममिदमुद्देश्यं विज्ञानविषयेषु विधीयमानानां शोधकार्याणाम् कृते आवश्यकं मन्यते। गणित-प्रभृतिशास्त्रेषु प्रायशः समस्यैव मुख्या भवति। तथैव सामाजिकविषयेष्वपि प्रबन्धनक्षेत्रस्यापि सर्वेषु विभागेष्वेषा समस्यासमाधानात्मिका(६) प्रवृतिः प्रामुख्यं भजते शोधकार्येषु। उदाहरणार्थं वैश्विक-उष्णता-समस्यायाः समाधानविषये विश्वस्मिन् प्रवृत्तानि शोधकार्याणि समुपस्थापयितुं शक्यन्ते। तत्रैकावधारणा-वर्तते यत्प्रकृतिः स्वयमेव सर्वां समस्यां नियमयति। तत्र बहवो विचाराः वर्तन्ते- यथा Co_2नियन्त्रणे वसति पृथिव्याः यत्र आक्सिजन, मिथेनतत्त्वश्च विद्यमाने भवतः। तथैव सामाजिकी याः विविधाः समस्याः(७) नीत्वा शोधकार्याणि प्रवृत्तानि दृश्यन्तेऽनुदिनम्। अनेनैव प्रकारेण जलप्रबन्धनम्, आपदाप्रबन्धनादि-क्षेत्रेषु समस्यासमाधानमूलमेव शोधकार्यं प्रवृत्तं दृश्यते। भाषा-साहित्य-क्षेत्रेष्वपि भाषा-लिपि-उच्चारण-शब्दप्रवृत्तिसाहित्यगतानिविविधानि तत्त्वानि खलूपगृह्य यानि शोध कार्याणि प्रवृत्तान्यद्य दृष्टिपथं नित्यमागच्छन्ति तत्रापि कारण-कार्यान्वेषणप्रवृत्या सह भाषा-साहित्य-गतानि समस्या-समाधानोद्दिष्टान्यपि मन्यन्ते। उदाहरणमत्र गृहीतुं शक्यते कस्यचिदपि वैदिक-ऋषेः वास्तविक-जीवन-वृत्तान्त-वर्णन-समस्या रूपम्-यतोहि तेषां जीवनवृत्तान्तवर्णनाय न स्पष्टं साक्ष्यं मिलति बहूनाम् ऋषिणाम् तथैव कालिदास-शेक्सपीयरप्रभृतिपूर्व पाश्चात्यप्राचीनकवीनामपि याथातथ्यनिरूपणसमस्या मन्यते शोधार्थिना। अतः शोधस्योद्देश्येषु समस्यासमाधान-गवेषणाऽन्यतमा भवति।

(४) यशः प्राप्तिः-

यद्यपि साम्प्रतिके शैक्षणिकानुसन्धानस्य वातावरणे, व्यावसायिके च शिक्षण-संस्कृतौ, शोधोद्देश्येष्वेतस्याः यशसः प्राप्तेः नास्ति विशेषं महत्वम् तथापि केचन यशसः प्राप्तिहेतवेऽपि शोधं प्रत्युत्कण्ठिताः प्रेरिताश्चाद्यापि दृश्यन्ते। व्यावसायिकानु सन्धानं प्रायशः मिन्नं भवति एतस्मादुद्देश्यात्। प्रासंगिकी तत्रापि यशसः प्राप्तिस्तु भवत्येव। अस्य संकेतः मम्मटेन दत्तोऽस्ति। यद्यपि काव्यप्रयोजनं(८) शोध-प्रयोजनं न भवितु मर्हति तथाऽपि खलु कवित्वे यान्वेषणात्मिका दृष्टिरस्ति नित्य-नूतन-चमत्कृत्याधानस्य काव्यसर्जनायां तदिङ्गयत्याधुनिक-शोधोद्देश्यमपि। कस्य शब्दस्य प्रयोगेण ध्वनिविशेषानुभूतिर्भविष्यतीति(९) भट्ट-नारायण-विशाखदत्तप्रभृति-नाटक-काराणां

गवेषणादृष्टिरेव, येन तेषां यशसः प्राप्तिरद्यापि पाठकानामनुभूतावागच्छति। अत्र यशसि नवावधारणैव कारणं भवति। बहूनि साहित्यकाव्य-तत्त्वान्यधीत्य कस्याचिदन्याः धारायाः प्रवर्तनैव नूतनावधारणा मन्यते या च पुनः चमत्कृतिप्रधाना च भवति। अत एव "कापरा महोदयेनोक्तम् - सूचनासंग्रहस्तु विचारप्रवर्तनायावश्यकं परन्तु वास्तविकरूपेण मानवबुद्धिस्तु विचारविश्लेषणप्रधाना एव" - एष भावः अत्र संघटते। अर्थात् पौनः पुनिकेन ग्रन्थाभ्यासेन तद्गत-सूचनानां[१०] परिशीलनं परिस्फुटति हृदये शोधार्थिनः। ततश्च स्वतंत्रो विचारो मूर्तरूपं धत्ते। तदाधारेण यशसः प्रसृतर्भवति शोधार्थिनः। अतः आचार्यमम्मटस्य या काव्यपरिभाषावर्तते सा परिभाषा, काव्यप्रयोजन-परिभाषया सह सम्मेल्य शोध-प्रविधि-सूत्र दृष्ट्या यदा विश्लेष्यते तदाऽवश्यमेव शोधोद्देश्यं पूर्णरूपेण पुष्यते। अनेनैव प्रकारेण स्थायिभावस्यान्वेषणमस्माकं शास्त्रज्ञानां परमं तत्त्वमस्ति यस्य भावमधिगमय साहित्यक्षेत्रेकृतमनुसन्धानं मानवमूल्यस्य वैविध्यमुपस्थाप्य[११] शोधार्थिनं यशस्विनं विधत्ते। तस्माद् विशेषरूपेण सहित्य-कला-सन्दर्भे मावनभावना मावनजीवनमूल्यश्चाधारीकृत्य प्रवर्तितमनुसन्धानं यशसा प्राप्तिसाधनंभवतीति मे मतिः।

(५) उपाध्युपलब्धयेऽनुसन्धानम् -

अद्यत्वेऽस्योद्देश्य प्राधान्यंदृश्यते बाहुल्येन विभिन्नेषुविश्वविद्यालयेषु शोधकार्यरतेषु छात्रेषु। नित्य-नूतननियमपरिवर्तन -परिवर्द्धन-प्रसंगस्याद्देश्यस्य शोध-कर्म-प्रवृत्तौ मुख्यताऽनुभूयते। विश्वविद्यालयीय-शिक्षणनिमित्तमेष उपाधिः अनुसन्धानस्यावश्यको भवति। विश्वविद्यालयअनुदान-आयोगस्य निर्मितनियमालोकेऽनुसन्धानकार्यस्य प्राबल्याद्व्याख्यातृ-पदे नियुक्तये (इदानी व्याख्यातृ-पद-नाम सहायकाचार्य-पदम् (Assistant Professor) जातम्) शोधोपाधिषु एम् फिल-कक्षायां सम्पादितस्य लघुशोध-प्रबन्धस्य (Dissertation) पी-एच.डी (विद्यावारिधेर्वा)उपाधेश्चावश्यकता भवति। तत्राऽस्ति वैकल्पिकोविधिः, नेट जे.आर. एफ. स्लेटादि-परी क्षोत्तीर्णताया अपि, तथापि विश्वविद्यालयीयशिक्षणप्रक्रियायां तत्सम्बद्ध-महाविद्यालयानामपि शिक्षण-संस्कृतौ ह्यनुसन्धानकार्यस्यावश्यकांगत्वात् शोधोपाधेस्तु (विशेषरूपेण पी. एच. डी इत्यस्य) आवश्यकता भवति। पूर्वं स्नातकोत्तर-कक्षोत्तीर्णानन्तरं साक्षात्कार-माध्यमेन योग्यतायाः आकलनं विद्यालयाध्यापकानां प्रायशः सर्वेषु विषयेषु नियुक्तिर्भवति स्म। जन संख्याविकासकारणात् प्रतिस्पर्धोपचयात्,

राष्ट्रिय-शिक्षणसंस्कृतौ गुणवत्तारक्षणबुद्धेश्च विश्वविद्यालय-अनुदान-आयोगेन (U.G.C.) योग्यतामानदण्डानां समये-समये परिवर्तनं विधाय, शोधकार्यस्यप्रवृत्तिवर्द्धनाय तत्पक्षात् छात्रवृत्यादि-सौविध्यं दत्त्वा शोधकार्यप्रवृत्तिमवर्धयत, शोधोपाधिश्चा चक्षध्यापक-नियुक्ति-कृते मानकीकृतः। यदा तत्रापि गुणात्मकसंशोधने शंका जाता - तदा राष्ट्र-स्तरीय-योग्यता-परीक्षा अध्यापनकार्यचिकीर्षूणां कृते निर्धारिता। परन्तु सर्वास्ववस्थासु शोधस्य महत्त्वं तु न्यूनं नाऽभूत्-विश्वस्तरीय -विश्वविद्यालयानामुनसन्धान-प्रतिस्पर्धाहितवे। अतोऽद्यास्य शोधस्य प्रथममुद्देश्यं जीवनवृत्त्युपलब्धि-संभावनायां विश्वविद्यालयेष्वंध्यापन-व्यवसाय-प्राप्तिरस्ति।

(६) राष्ट्रियगौरवाय :-

कस्यचिदपि राष्ट्रस्य बौद्धिकसम्पदा (Intellectual property) समृद्धि एवं विकासः (Prosperity and Development) सुरक्षा एवं शान्तिः (Protection & Peace) इमे चत्वारोऽपि पदार्थाः तस्य गौरवाय भवन्ति। विशेषरूपेण भारतराष्ट्रस्य विश्वक्षितिजे विद्योतनस्य मूलं कारणमस्ति अस्य राष्ट्रस्य ऋषीणां बौद्धिकसम्पदा एव : याऽस्माकं वेद -पुराणेषु, ज्योतिषायुर्वेदादि-प्रत्यक्ष-वैज्ञानिक-शास्त्रेषु निहिताऽवलोक्यते। अत्रावधेयमस्ति यदस्माकं ऋषयः कालद्रष्टारः परन्तु प्रतिशोध-प्रतिक्रियादिमानवीयदुर्गुण-विहीना आसन्। केचन तानाधुनिक-भाषायां वैज्ञानिकान् मन्वते। परन्तु वैज्ञानिक-शब्दस्तेषाङ्कृतेऽल्पमहत्वप्रदायकोऽस्ति इति मन्ये। यतो हि वैज्ञानिका अद्यतनीयाः क्रिया-प्रतिक्रियाभावनोपेताः, तेषाञ्चावधारणा- पदार्थ-विश्लेषणप्रधानाऽविश्वस्ताश्च परवस्तुन्यदृष्ट-वस्तुनि च। परन्तु न्वस्माकं ऋषयः दृष्टा-दृष्ट वस्तुविशेषज्ञाः रचना-विकास-सिद्धान्तप्रियाः आसन्। तदवधारणकारणादेव मानवानां भौतिकं जीवनं दैवी-जीवनं कृत्वा ततोव्यग्रे विकासं विधाय ब्रह्मरूपेण परिणमयितुं ते क्षमाः आसन् यस्य संकेतः अद्य कतिपयानामाधुनिक-वैज्ञानिकानां ग्रन्थेषु विचारेषु मिलति। अतोऽत्र राष्ट्रिय बौद्धिक सम्पादायां विकासायापि केचन शोधार्थिनः शोधकर्याणि कुर्वन्तो दृश्यन्ते। उदाहरणार्थं पृथिव्याकाशादि-मिसाइलविकास-नामकरणे भारतस्य जगते दर्शयितुं यतन्ते यदस्माकं सांस्कृतिके पृथिव्यादि मिसाइल-पदावच्यस्य नामकरण प्राचीनर्षीणां भौतिक-विज्ञानदृष्ट्या सहालौकिकदृष्टिरपि आसीत् - तथा च

पृथिवी सर्वं साधयति। नियन्त्रयति च इति तेषां विश्वास आसीत्। अतोऽस्माकमार्यावर्तखण्डं भुम्याःन कश्चिदूषयेत् आक्रमणेनेति खल्वाधुनिक-युगेऽपि वैज्ञानिकाः भारतस्य तत्तन्नामप्रक्षेणास्त्राविष्करणेन दर्शयन्ति शत्रून्। तथैव जीवनप्रबन्धनक्षेत्रे, सामाजिकक्षेत्रेऽपि प्रवृत्तानामनुसन्धानानामुद्देश्यं राष्ट्र-गौरववर्धनमेवास्ति। एषाप्रवृत्यस्माकं शोधार्थिनां कृते राष्ट्र-धर्म-श्रेत्रेऽन्विता भवति यस्य संकेतः वेदस्य राष्ट्र-सूक्तगतेषु मन्त्रेषु दृश्यते। एकस्मिन्नेव मन्त्रे समाजप्रबन्धनक्षेत्रे अर्थप्रबन्धन-क्षेत्रे, ज्ञान-प्रबन्धनादिक्षेत्रेष्वनुसन्धानप्रवृत्तेः संकेतो मिलति तथाचानुसन्धानं राष्ट्रियगौरवाय भवेदित्यपि ऋषीणां निर्देशोऽवलोक्यते। E V Ë g d @ Y r Ë ` m ñ _ A.P.J. अब्दुलकलाम-महोदयाः स्वकीय Ignited Mind इत्यस्मिन् ग्रन्थे एकं प्रकरणं लिखितवन्तः विशेषरूपेण[११] यस्य नाम-वर्तते "Learning from saints and seers" अनेन सिद्धं भवति यद्नुसन्धानस्योद्देश्यं राष्ट्राभिवर्धनं, राष्ट्र-गौरवस्थापनञ्चास्ति। तत्कारणादपि शोधार्थिनः भारतस्य प्रवर्तन्ते शोध-कर्मसु। तथैव राष्ट्रस्य समृद्धि मप्युपलक्ष्यास्माकं भारतेवर्षे कृषिवैज्ञानिकाः शोधकर्मसु दत्तचित्ताः सन्ति - येनास्माकं राष्ट्र-गौरवं वर्धते।

(७) व्यष्टि-स्मष्टि-दर्शनम्ः-

आधुनिक-अनुसन्धानस्योद्देश्येषु व्यष्टेः (of individuality) सम्बन्धः समष्ट्या सह (with living organisms) स्थापनं तत्परीक्षणं, तदनुसारेण च परिकल्पनाया (of Hypothesis) प्रमाणीकरणं, सिद्धान्तनिर्माणं, सिद्धान्तस्य च प्रयोग-फलावाप्तिश्चास्ति। अस्मिन् सन्दर्भे योगी-अरविन्दः विवेकानन्दः पाश्चात्य-चिन्तकेषु च ----- (लीन मारगुलिस) लवलोक (Lovelock) मार्टिन (Martin) कापरा (Fritjof capra) प्रभृतयः पठनीयाः सन्ति येषां विचारोऽस्माकं वेदस्य नासदीयासूक्तालोचन-सन्दर्भे सृष्टि-सृष्टि-विकास-सन्दर्भे, अवयव-अवयवी-सम्बन्ध-विश्लेषणे, सांख्यस्य प्रकृति-विकृत्योः वैज्ञानिकपरिशीलने, वेदान्तस्य माया-ब्रह्मणोः निरूपणप्रसंगे, जीवब्रह्मणोश्च सम्बन्ध-परिशीलने, जड़-चेतन-वस्तुनोः जीवननिर्माणे संचालने च परस्पर-सहयोग-परिशीलनेऽत्यन्तमेवाश्यकोऽस्ति। अत्रैव क्षेत्रेऽवसरोऽयंमिलति शोधार्थिने, यत्र पारलौकिकं वस्तु लौकिकवस्तुना सह तुलयितुं शक्यते - प्रकृतिरपि भौतिक-पदार्थेऽनुभूयते तथा च सामजिकसंरचनादृष्ट्या, भूमण्डलीकरणस्य सकारात्मक-

फलावाप्तिदृष्ट्या प्रत्येकस्य वस्तुनः, देशस्य, समाजस्य, मनुष्यस्य निर्माण-विकासयोः कृते प्रत्येकस्यवस्तुनः, देशस्य, समाजस्य, मनुष्यस्य, वातावरणस्य, पर्यावरणस्य योगदानमङ्गी क्रियते। एतदेवान्तः स्थितं सूत्रं मानवकल्याणदृष्ट्या विश्वस्तरीय-संगठेनषु सततं कार्यं करोति, तथा च विश्वमानवसमूहसमस्यासमाधानार्थं विश्वस्तरीयाः संस्थाः कार्याणि विविधानि प्रचालयन्ति। अनेन प्रकारेण शोधोद्देश्येष्वनन्यतममिदमपि उद्देश्यमस्ति।

शोधाय सामान्यावधानता :-

अद्य शोध-प्रविधि-क्षेत्रे बह्व्यः प्रवृत्तयो दृश्यन्ते। तत्राधुनिकशोध-प्रसंगे प्रायशः आधुकि-ज्ञानविज्ञानयोरेव(१) शोधप्रविधेः लेखनस्य प्राचुर्यप्राधान्यश्चावलोक्यते। उदाहरणं यथा सामाजिक-शोध-प्रविधिः प्रबन्धन(२)-शोधप्रविधिरिति। उत्पादना भिमुखि-शोधप्रविधेः प्राधान्यश्चार्थिक क्षेत्रे, औद्यौगिकप्रतिष्ठाने च दृश्यते। तत्तक्षेत्रे एकैका-शोध-सेल (Research cell) इति नाम्नी संस्था कार्यप्रवृत्ताव्यवलोक्यते। औद्योगिकसंस्थासु HR इति संकायस्य सम्बन्धः विशेषरूपेणान्तरिक रूपेण च तयैव संस्थया भवति। अत आवश्यकतामभिलक्ष्य बहवो शोध-प्रविधि-ग्रन्थाऽपि आपणेषु(३) उपलभ्यन्ते। परन्तु वास्तविक-रूपेण शोध-कार्याणां सीमा कयाचिद् दृष्ट्या न निर्धारयितुं शक्यते। स्व-सौविध्याय विशेषशोध-प्रविधिर्निर्मीयत इत्यन्यद्विषयः।

अतः उपर्युक्त विषयगतशोध-प्रविधीनां परिशीलनात्मकाध्ययनेन केचन गुणाः सामन्याः प्रतिभान्ति तदतिरिक्ताश्चान्ये गुणाः विशेष-विषय-सम्बद्धा इति। विशेषरूपेण तु-संस्कृत-भाषा-साहित्यानुसन्धान-क्षेत्रे शोधप्रविधिग्रन्थानां संकोचोऽनुभूयते। कराङ्गुलि-परिमिता एव ग्रन्था अद्याप्युपलभ्यन्तेऽस्माकं संस्कृताध्ययनक्षेत्रे। अस्माभिस्तान् शोधप्रविधिलेखकान्प्रत्याधमर्णत्वेन भाव्यं येषां शोधस्य सामान्यावधारणया कश्चित्प्रकाशोऽस्मानद्य मार्गं दर्शयति। भवतु नाम संकोचो लेखने संस्कृत-भाषा-साहित्य-शोधप्रविधेः, परन्त्वत्र विचारणीयो विषयोऽस्ति खलु शोध-कार्यस्य सामान्य योग्यता के सन्तीति। तत्रैवाभिनिवेशोऽस्त्यस्यप्रकरणस्य।

(अ) शोधस्य सामान्याः योग्यताः।

शोध-कार्यं कस्यचिन्नूत्नस्य पदार्थस्यान्वेषणं भवतीति सिद्धम्। तन्नूतन-पदार्थावाप्तये सुनिश्चित-कार्यक्रमेणाग्रे गन्तव्यं भवति शोधार्थिनाङ्कते। सुनिश्चित् -

कार्यक्रमनिर्धारणे सर्वप्रथमा आवश्यकता भवति, इच्छाशक्तेः दृढ़भूम्याः। यद्यप्येष विधिर्नास्ति तकनीकीदृष्ट्या सुप्रयोक्तव्यः तथाप्येषनोपेक्ष्यः। इच्छाशक्तिश्च तदैवोत्पद्यते यदा तदाधारभूतं वैषयिकं ज्ञानं शोधार्थिनि भवति स्थितम्। ज्ञानजन्या काचिन्नवतत्त्वान्वेषणेच्छाजायते, ततश्च प्रवर्तना क्रियायां भवति। तस्य शोधार्थिनः प्रवर्तना एवात्र व्यापारः तच्च फलमभीष्टं जनयति सैवशास्त्रपर्धद्धतिरस्त्यनु-संधानविधिसम्बद्धा। कदाचिदुत्साहः प्रेरयति शोधकर्मणि परानुसरणजनितस्तस्मात्ततो विरामः श्रेयः। एतस्याः इच्छायाः प्राचीनज्ञान-विज्ञानप्रभृतिरिदानीन्तनीय ज्ञानविज्ञानविषयकानु-सन्धानक्षेत्रेष्वपि समानप्रवृत्तिः। अस्मादेव कारणात् खल्वतिगभीरशास्त्रधाराप्रवाहेषु जिज्ञासैव निमित्तं बभूव। यथा **अथातो धर्मजिज्ञासा अथातो ब्रह्मजिज्ञासा** इत्यादि। आधुनिक-चिकित्साक्षेत्रे, आभियान्त्रिकीक्षेत्रे, भौतिक-शास्त्रादिक्षेत्रेषु सर्वकारस्य प्रेरणात्मक-शिक्षण-नीत्याऽपि तत्तत्क्षेत्रीयशिक्षित-यूनामुच्चशोधकर्मसु प्रवृत्तिर्न भवति। अन्यान्यपि तत्र सामाजिकार्थिकादि कारणानि भवितुमर्हन्ति तथापि मुख्यं तु कारणम्-प्रवृत्तेस्तत्रेच्छाशक्त्या अभाव एव।

(ब) दृढ-संकल्पः - ज्ञाने जाते ऽपि जने किञ्चिन्नूतनं वस्त्वन्वेषणीयमितीच्छा जायेत-इति नास्ति सामान्यो विधिः शोधव्यापारस्य। अत्र गीतायाः पद्यमेव प्रमाणमस्ति यस्मिन् भगवान् स्वयमेव कथयति **"कश्चिन्मांवेत्ति तत्त्वतः"**(१) अत्रावधेयमस्ति खल्वा ध्यात्मतत्त्वानुसन्धानस्य विधिविलिसितम्। अतः सत्यामपीच्छायां शिवसङ्कल्पाभावे नोपजायते प्रवृत्तिः शोधे। अतः सर्वविधशोधविषयसामान्योऽयं नियमोऽस्ति यच्छोधार्थी स्याच्छिवसंकल्पवान् दृढ़-सङ्कल्पवान् च। दृढ़-संकल्पना(२) यदाशोधार्थिनि भवति तदा तस्य प्रयत्नः प्रभावकरो भवति। संकल्प-शक्त्यैवायासं सोढ्वाऽपि प्राचीना अस्मांक ऋषयः ब्रह्मावाप्तिमार्गं वेदान्तदर्शनाध्ययनयोगाभ्यासेन च ज्ञातवन्तः। तथैवान्यान्यपि दर्शनानि लक्ष्योपलब्धौ ऋषीणां शुभसंकल्पनात्, दृढ़-संकल्पनाच्च सफलानि जातानि। वैदिक-ऋषीणां समुदाये, ऋषिकाणाञ्चसमवाये बहवो ऋषयः (भरद्वाज-प्रभृतयः)(३) ऋषिकाश्च (गार्गीत्यादयाश्च) जगतोमूलकारणान्वेषणे सफलप्रयत्नाः दृढ़संकल्पकारणादेवाऽभवन्। आधुनिके समाजेऽपि केचनभारतीयाः वैज्ञानिकाः(४) तादृशाःवर्तन्ते येऽन्तरिक्षविज्ञान-क्षेत्रे संकल्पित-तत्त्वान्वेषणे दत्तचित्ताः दृढ़संकल्पनाकारणादेव प्रतिभान्ति। अस्मिन् सन्दर्भेऽस्मद्भारतीयकन्यावतंसमभूतायाः

''चावलाया:'' नामस्मरणं गौरवाय भविष्यति, या दृढ़संकल्पकारणात् मृत्युभीता न जाता तथा च स्वलक्ष्यं प्रति जीवनं समर्पितवती।

ताटस्थ्यवृत्तिः -

अनुसन्धान-सम्पादनकर्मणि रतस्य शोधार्थिनः योग्यतासु ताटस्थ्यवृत्त्यप्यावश्यकी भूता भवति। नीर-क्षीर-विवेकशीलस्य शोधार्थिन एव शोध-कार्यं लोके महत्त्वं बिभर्ति। अस्मिन् सन्दर्भे देशकालपरिस्थित्यानुकूलमेव ताटस्थयवृत्तिरवलम्बनीया भवति शोधार्थिना। यस्याः ताटस्थ्यवृत्तेः समाजे शुभं, शान्तिः सौहाद्रश्चोपजायन्तान्तत्ताटस्थ्यवृत्तिरेवश्लाघ्या मन्यतेऽनुसन्धानकर्मसु। प्रायश एष नियमः सामाजिक-शास्त्र सम्बद्धानां विषयाणां सन्दर्भे विशेषरूपेण पालनीयो भवति। यदा-कदा ऐतिहासिकानुसन्धानकर्मणि सम्प्रत्येषा वृत्तिर्नानुपाल्यते कतिपयशोधार्थिभिरिति चिन्त्यम्। अत्र ताटस्थ्यपूर्णानुसन्धानविषये एतदपि विचारणीयं वस्तु भवति, यत् यादृच्छिक[१] वर्णनमपि ताटस्थ्यं न गण्यते प्रायशोऽद्यशोधप्रबन्ध लेखने तस्य ह्रासो दृश्यते तस्मादेव कारणात् एकामदीया नूतनादृष्टिरत्र'' मम शोधप्रबन्धे वर्तत इति विचार्य व्यक्तिगत-वर्णनशैल्याः, शोधकार्यदौर्बल्यस्य चानेन कथनेना वरणमेव प्रस्तूयते। उदाहरणार्थम् यदि कस्मिश्चिच्छोध प्रबन्धे साहित्यस्य, ध्वन्यात्मक विश्लेषण-प्रसंगे शोधार्थिनी, शोधार्थी वा कथयेत् यदत्र साहित्ये कस्याश्चिन्नायिकायाः पाद-बद्ध-नूपुराद्यलंकाराणां संघट्टन-जनितध्वनेरभावान्नध्वनिरिति। तथा च कश्चिट्टिप्पणीकारो कथयेत् यदेतन्नलक्षणंसाहित्य शास्त्र-ध्वनेरिति तथा तदज्ञानतापह्नव दृष्ट्या शोधार्थी यदि कथयेत् यदेषा मम नूत्ना दृष्टिवर्तते, तदैवतस्य शोध-प्रन्धस्य वैशिष्ट्यमिति-तदा वृत्तिरेषा स्वच्छन्दात्मिका भविष्यति। शोधार्थिना न्यायाधिकारीवच्छोधप्रबन्ध-लेखने वर्तितव्यम्। एतदस्माभिश्चिन्त्यम् यच्छोधकार्यं व्यक्तिविशेषस्य कृते न भवति प्रत्युत् समाजस्यैकाबौद्धिक विकासलक्षणसम्पदा भवति, यतोऽग्रे बौद्धिकविकासधाराप्रवहन्ती सरति। अतः शोधविषयक-समस्यायाः समाधाने ताटस्थ्यं परन्तु मर्यादितं व्यवहरणं शोधार्थिना विधातव्यम्।

सकारात्मिका-दृष्टिः।

शोध-कर्मणि बह्व्यः समस्या आगच्छन्ति। नाट्यशास्त्रे यथा कस्यचिन्नाटके कथानकस्यारोहावरोहयोः स्थितिर्भवति, यस्य समावेशः नाट्यशास्त्रस्य पताका-

प्रकरी[1]-सन्ध्यादिषु निवेशो वर्तते, तथैवैकस्यशोधार्थिनोऽपि स्थितिर्भवति। अतः अस्यामवस्थायां कदाचिदित्थं भवति मनसि यदेष विषयः अत्यन्तमेव सरलः, अतः अल्पीयसा समयेन साध्यः। तत्र गभीरचिन्तनस्यावसरो, नूतनतत्त्वान्वेषण दृष्टिश्चापह्रियते। कदाचिच्चा नुभूयतेशोधार्थिना यदेष विषयः प्रपञ्चप्रधानः साध्योनास्ति इति। एतदनुभूय शोधार्थिनि नैराश्यमुपजायते शंकोत्पद्यते फलं प्रति। एष अवसरः नकारात्मक-मनोवृत्तेः प्रारम्भकालः। यावच्छक्यं शोधार्थिना खल्वेतस्मादात्मनः रक्षणं विधेयम्। अस्यैव बीजस्याङ्कुरावस्था विषयप्रतिपादनेऽपि शोध-कार्यस्य दृष्टि-पथं शोधार्थिन आयाति, तथा चावरोधं स्थापयति सकारात्मकचिन्तनप्रवाहे, येन कदाचित्खिद्यतेऽन्वेषणीय विषयं विलोक्य, शोधार्थी ततश्च सर्वत्रैव नकारात्मक-भावाभिव्यञ्जन मेव तस्य शरणं भवति। एषा सकारात्मिका शेध-प्रविधि-सम्बद्धा दृष्टिः इच्छाशक्ति-प्रसूता, विश्वासप्रसूता, स्वस्थमानसिकस्थिति-प्रभवा, एकाग्रचित्तवृत्ति-पोषिता च भवति। अद्यानुसंधान-प्रविधिक्षेत्रे ह्येतस्याः स्पष्टं महत्वं न प्रतिभाति, परन्तु संस्कृत-भाषा-शास्त्रीयग्रंथानामाविष्करणविषयक-परिशीलनेन प्रतिभाति यत् अनुसन्धान कर्मणि सकारात्मक-दृष्टेः आवश्यकता भवत्येव। उदाहरणम् अस्माकं शास्त्रीय-ग्रन्थेषु बहुवर्तते तथाऽपि नचिकेतसः प्रह्लादस्य, भगवतो हनुमतश्च व्यक्तित्ववृत्तान्ताः, अलौकिक-प्रज्ञा च तेषां उदाहरणरूपेण ग्रहीतुं शक्यन्ते। अस्मात्काराणात्सकारात्मक-दृष्टि-माध्यमेनैव सञ्जीवनी-वनस्पतिं हनुमान् अनयत्। मृत्युलोकं च गत्वा यमेन सह वार्तां विधाय मृत्योः प्रायोगिकं स्वरूपं नचिकेता साधितवान्। तथैवैश्वरं प्रति सकारात्मकबुद्धेः कारणदेव प्रत्यक्षमेवाग्निवद्दाहशक्तिं वशीचकार प्रह्लादः। याज्ञवल्क्यश्चाप्याह -

वेदार्थपुराणानि सेतिहासानि शक्तितः।
जपयज्ञप्रसिद्ध्यर्थं विद्यांचाध्यात्मिकींजपेत्॥ -या०स्मृ० ५/५

अस्यैवानुसन्धानविषयकसकारात्मकभावस्य निरूपणं मीमांसायां भावना-रूपेण विहितमस्ति-यस्मात्कारणाद्यजनकर्तरि "मत्प्रवृत्यनुकूलोव्यापारवानयमिति" सकारात्मिका दृढ़ा भावना समुत्पद्यते। कणादस्य परमाणुक्षेत्रे तथैव "आईनस्टीनस्य" डॉ. अब्दुल कलाम-महभागस्य च दृढा, सकारात्मिकादृष्टिरेव स्व-स्वशोधकर्मणि विचार-प्रयोगे साफल्यमजनयत्। केचन विचारकाः एतां सकारात्मिकां दृष्टिं रूपान्तरेण बौद्धिक गुणेषु[1] शोधार्थिनः गणयन्ति, तदाधुनिक-समाज-शास्त्रीय-मनोविज्ञानविषयिणी

प्रतिभाति, यत्र सर्वेक्षणपद्धत्या, प्राप्त सर्वेक्षण-प्रतिवेदनानां विश्लेषणेन संबद्धेति मन्यते।

विषयाभिरुचिः -

अनुसन्धानस्य मुख्यविषये शोधार्थिनोऽभिरुचिरत्यन्तमेव महत्त्वमावहति। अस्मिन् सन्दर्भे अधीत-शास्त्र-सम्बद्धविषय-चयनमेव शोधार्थिनः शोध-कर्मणेऽभीष्टं साधयति। सम्प्रति बहवोहि छात्राः, छात्र्यश्च बह्व्यः केवलं मार्गदिर्नेशकहस्त क्रीडनकंबुभूषन्ति। तन्नश्रेयसे भवति छात्रेभ्यः। एतदवश्यमेव विचारणीयं वस्तु विद्यते यच्छोध-कार्यं मूलरूपेण शोधार्थिना एव सम्पाद्यं भवति। तद्गतं यशः अपयशश्चापि शोधार्थिन एव प्राथम्येन भवति। शोधमार्गनिर्देशकस्तु पथ-प्रदर्शको भवति, यथा सूर्यः चन्द्रश्च स्वप्रकाश-पुञ्जैः पथिकं पथमेवप्रदर्शयति, न तु पूर्वादिदिक्षुं गमनाय कथयति तथैव प्रायशो भवन्ति शोध-मार्ग-प्रकाशकाः मार्गनिर्देशका अपि। प्राप्ते काले, अपितु काले-काले दुरूहविषय एव मार्गदर्शकाः प्रष्टव्याः। शोधार्थिनः कार्यं लक्ष्यं प्रतिगच्छति न वेति निरीक्षते मार्गदर्शकः। अतः विषयविशेषाभिरुचिशील एव शोधार्थी मार्गदर्शकिन शोध-कर्मणि योजयितुं शक्यते, निर्देशनमपि कार्यसिद्धयेऽवाप्तुं शक्नोति मार्गदर्शकात्। उर्वराशक्तिरहितायां भूमौ यथा न बीजाङ्कुरणं तथैवाभिरुचिविहीने शोधार्थिनि न सम्यक्-शोधकरणोत्साहोत्पत्तिरिति मे विश्वासः। सम्प्रति विश्वविद्यालय-अनुदान-आयोगेन शोध-प्रवेश-परीक्षायाः विधानं कृत्वाऽनावश्यक- छात्रसम्मर्दोऽनेन वारित इति महान् सन्तोषस्तथापि छात्राणामभिरुचिः विषयानुकूला, स्वनिर्णयप्रसूता भवत्येवेति कथने संकोचो भवति। व्यवसायात्मिका मतिःशोधार्थिनां लुम्पत्यध्यवसायात्मिकां भावनामभिरुचिं चोत्तमानुसन्धानस्य। जीवनवृत्यवाप्तिलक्ष्यैकबद्धमनुसन्धानं, स्थिरयति शोधस्यापेक्षितं स्तरम्। विषयाभिरुचिः शोधकर्म-लोके प्रभावकरी भवति। शास्त्रेषु ज्ञानशक्तेः इच्छाशक्तेः क्रियाशक्तेश्च क्रमिको विलासः प्रोक्तः यासां सामूहिक-चेष्टया कस्यचिदवस्तुनः विशिष्टं ज्ञानमवाप्यते। उपर्युक्ताः प्रायशः सर्वे पदार्थाः शोध-कर्मणि खल्ववधानतायाः वेदार्थग्रहणेऽन्विताः। अतएव वेदार्थस्य ग्रहणप्रसंगे नानाभिरुचयो दृश्यन्ते मानवेषु। केचन अध्यात्ममात्रं पश्यन्ति वैदिकसाहित्ये यथाऽरविन्दादयः केचन च यज्ञानेव पश्यन्ति वैदिकमन्त्रेषु। अतोऽनुसन्धानक्षेत्रे विषयाभिरुचिरस्त्यनिवार्या।एतदत्रावधेयं यत् कामो हि जनयति विशेषाभिरुचिं जने-अत एवा "ग्निष्टोमेन स्वर्गकामो यजेत्"- इति विधिवाक्यं स्वर्गं प्रत्यभिरुचिमुत्पादयति यजमाने। अथर्ववेदस्यैकस्मिन् मन्त्रे संकेत-माध्यमेनैतस्य कामस्य,

तदनन्तरीयक्रियाभावे फलं नोक्तम्। प्रत्युदेतेन दिव्या जनेच्छाशक्त्योत्पादितविषय-ज्ञानाभिरुच्यपि फलसाधनाय प्रोक्ता। यथा-

न कामेन पुनर्मघो भवामि सं चक्षेकं पृश्निमेतामुवाजे।
केन तु त्वमथर्वन् काव्येन केन जातनासि जातवेदाः ।।-अथर्ववेद-५/११/२

अत्र मन्त्रे "न कामेन पुनर्मघो भवामि।" इति संकेतयति यत्केवलं इच्छा न भवति खलूद्यमफलप्राप्तये पर्याप्ता प्रत्युत्तत्राभिरुचिरय्यावश्यकी विद्यते। अभिरुचौ च पुनरुत्साहोऽपि भवति यत्प्रेरयति जनं मानसिकीमूर्जां प्रदाय तस्मै। परन्तु इच्छा कामो वा ऽऽलस्यमुपगतेऽपि जने भवति। आधुनिकशोधप्रविधौ सामन्यावधानताप्रसंगेऽस्य भावस्य मुख्यं प्रयोजनमस्ति शोध-कर्मणि केवलेन कामेन न भाव्यं-शोधार्थिना प्रत्युच्छोधविषयं प्रत्यमिरुचिरपि भाव्या तस्य। अत एवाह यास्कः साक्षात्कृद्धर्माणो ऋषयो बभूवुः तेऽवरेभ्य असाक्षात्कृद्धर्मेभ्यः मन्त्रान् संप्रादुः।

ते बिल्मग्रहणाय......। इति। अत्र बिल्मग्रहणं रूपान्तरेण शोधनीयं तत्वमिङ्गयति। यास्कीयमेतद्वचनं विषयं प्रत्यभिरुचिं प्रतिपादयति यत्र प्रियस्य वस्तुनोऽन्तर्गर्भिततत्त्वान्वेषणायानवरत-प्रयासोऽपेक्षितो भवति। पाणिनीयसूत्रस्य 'रुच्यर्थानां प्रियमाणः"(१/४/३३) इति सूत्रं यद्यपि चतुर्थीविधाने प्रवृत्तन्तथापि मीमांसाऽस्य सूत्रस्यार्थम् = प्रयोजनं प्रत्युत्साहमपि सूचयति - अथाऽस्यसूत्रस्यवृत्तिः- "रुच्यर्थानां धातुनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात्। अन्य कर्तृकोऽभिलाषोरुचिः" - अत्र अन्यकर्तृक-पदमेवान्वेषणीयं वस्तु प्रति रुचिमभिरुचिं वा द्योतयति-अतएव आह प्रीत्याश्रयकर्तृकः किञ्चिद्विषयक-इच्छाविशेषोऽमिभाषः। अत्रानुसन्धानप्रसंगेऽनुवादो भवेत्तदा खलु सूच्यते यत् विषयाभिलाषापूर्वकमनुसन्धानरीत्या यत्किञ्चिदपि नूतनवस्तूपस्थापनेन लोकाय संप्रदीयते तस्य भद्रं कर्तुं तत्र चतुर्थी-अर्थात् तुरीयब्रह्मवदानन्दकरं भवतीति।

अनेनप्रकारेणाधीतशास्त्रविशेषं प्रति प्रेरयति प्रीतिमनुसन्धानाय जनमितिभावः। एतदतिरिक्तान्यन्यान्यपि तत्त्वानि शोधकार्यं सम्यक्-सम्पादनाय सामान्यावधानता स्वरूपाणि सन्ति येषां संकेतं विधत्ते वेदः - यथा-

मनसे चेतसे धिय आकूतय उत चित्तये।
मत्यै श्रुताय चक्षसे विधेम हविषा वयम् ।। अथ०६/---

ब्रह्मचारी ब्रह्मभ्राजद् बिभर्ति तस्मिन् देवा अधि विश्वे समोताः। प्राणापानौ जनयन्नादव्यानं वाचं मनो हृदयं ब्रह्म मेधाम् - अथर्व -११/६/२४

अत्रावधेयमस्ति यत् वैदिकंज्ञानं, स्पष्टवाग्, मानसिकं बलम्, प्रज्ञा च प्राप्तविषयज्ञानं प्रति जनयन्त्यभिरुचिं, येनोत्साहितः कश्चित्प्रवर्ततेऽनुसन्धानकर्मणि।

कल्पनाशक्तिः सकारात्मक-स्वप्नश्च।

कस्यचिद्वस्तुनो मूलस्वरूपं ज्ञातुं बाह्यवस्तुस्वरूपज्ञानेन सह कश्चिदंशोभवति कल्पनायाः, यन्नैयायिकभाषायां तथा सांख्यादि-शास्त्रीयभाषायामनुमानस्य विषयो भवति। परन्तु अनुसन्धान-भाषायां कार्य-कारण-भावज्ञानं वस्तुनोऽन्यस्वरूपज्ञानं च कल्पनारूढ प्रमाणवादेनैव भवति। जटिलतां वारयितुमहं स्पष्टं करोमि यच्छोध-प्रविधौ आधुनिककल्पनाशक्तेः सत्स्वप्नस्य चातीव महत्वमस्ति। आधुनिक धिक-युगस्य महान्तो वैज्ञानिकाः महा महनीयाः पूर्वराष्ट्रपतिमहोदयाः श्री ए.पी.जे. अब्दुलकलाम-महाभागाः स्वकीये "Ignited Minds" इति प्रेरकपुस्तके कल्पनाशक्तिप्रसूतस्य सत्स्वप्नदर्शनस्य महत्वमुपवर्णयन्नाह-

Dream, Dream, Dream,
Dreams transform into thoughts
And thoughts result in action.

अर्थात् शोध-प्रविधौकल्पनाशक्तेः महतीभूमिका मन्यते। संस्कृत-भाषा-साहित्य-क्षेत्रे कल्पनैव प्रसविनी बभूव प्राक्काले काव्यसर्जनायामस्याः भाषा-साहित्यान्वेषणवैविध्ये च। वस्तुतः भारतीय-दर्शनानामाविष्कार; उपनिषत् साहित्यस्य ऋषीणामुपस्थित-ब्रह्म-जगत-विषयक-चिन्तनाधारामेवोपगृह्य प्रवर्तितः वर्तते-यत्रावान्तरकालीनानामृषीणां कल्पनाश्रयेण विभिन्नाः धाराः अध्यात्म-दर्शनयोः निःसृताः। तस्मादेतत् सिध्यति यद्रचनात्मक-कल्पनाऽपि शोधार्थिनमभीष्टं प्रति गमयति। आधुनिक-शोध-प्रविधौ तु कल्पनायाः सकारात्मक-स्वप्नस्य च महद्योगदानं निरूपितमस्ति यस्य विशेषं वर्णनमग्रे विधास्यते।

संस्कृत-साहित्येऽनुसन्धान सूत्राणि -

एतदत्र वक्तुं शक्यते यत्संस्कृत-भाषा स्वयमेवैकमद्भुतमनुसन्धानफलमस्ति यस्योद्गमस्थानमार्षप्रज्ञा[१] वर्तते। तस्याः प्रथमं दर्शनं वैदिक-भाषा[२]-साहित्यरूपे भवति, ततश्चलौकिकसंस्कृत-भाषा-साहित्य-समवाय-रूपे। आर्षीप्रज्ञैवमन्ये प्रयोगदशायां[३] ऋतम्भराप्रज्ञारूपेण योग-दर्शने कालान्तरे जाता या ज्ञाताऽज्ञात-वस्तूनां परिशीलनं लोक-परलोकावाप्तये साधनं भवति। अनुसन्धानस्यवैदिकऋषीणामेकस्यैव ब्रह्मतत्त्वस्यात्यन्तमेव सर्वपदार्थावगमनाय तादृङ्महत्वं बिभर्ति येन नाराध्यं किमपि लोके भवति। एतादृक्तत्त्वस्य निदर्शनं ऋग्वेदस्य नासदीयसूक्ते प्रजापति-सूक्ते, पुरुष-सूक्तेऽथर्ववेदस्य चोच्छि ष्टब्रह्म-सूक्ते सम्यक्तया दृश्यते। तथैवोपनिषत्[४] साहित्येऽप्येकस्य ब्रह्मज्योतिषः प्राप्त्या सर्वेषामज्ञात-तत्त्वानांज्ञानं भवतीति प्रतपादितम्। ब्रह्म सत्यं जगन्मिथ्या इत्यादि वेदान्त-सिद्धान्त-स्थापनमपि न सामान्यं कार्यं प्रत्युदन्तः प्रज्ञासमर्थित-योगसिद्धं ऋषीणां गवेषणाफलमेव। प्राचीन वैदिक संस्कृतौ, स्मृति-पौराणिक-कालेषुचैतस्यानुसन्धानस्य स्वरूपं प्रायोगिकमधिकं प्रतिभाति। तथैव सांख्यशास्त्रस्य सत्कार्यवादः, बौद्धानां शून्यवादसिद्धान्तः क्षणिकवादो वा, जैनानां स्याद्वादादयोविकल्पनाः भारतीयसंस्कृतौ बौद्धिक विकासक्षेत्रेऽनुसन्धान फलान्येव सन्ति येषामङ्केषु विश्वदर्शनानि क्रीडन्ति। अनुसन्धान-सूत्रम्, अनुसन्धान-प्रविधिरिति वा शब्दं नोक्त्वा अनुसन्धानेत्यवधारणायां ये केचन विषयाः आयान्ति तेषां दिग्दर्शनमस्माकं वेदेषु, पुराणधर्मशास्त्रादिग्रन्थेषु च सम्यक्तया भवति। सर्वप्रथमं तु मूलतत्त्वान्वेषणमेव सर्वं शोध-प्रबन्धं जीवयतीति रिद्धं भवति। यथा पूर्वतनीयाः वैज्ञानिकाः अद्यतनीयाश्च वैज्ञानिकाः शोध-प्रायोजनां प्रपूर्य तल्लक्षित-फलमवाप्य चातिप्रसन्नाः भवन्त उद्गारमुत्साहश्चोच्चस्वरेणाभिव्यञ्जयन्ति तथैव वैदिकमन्त्रेष्वपि कतिपयेषु स्थितिरवलोक्यते ऋषीणाम्। तथाचानुसन्धान प्रविधिविषयाः न केवलं वैदिक-साहित्ये प्रत्युद्योगादिशास्त्रेष्वपि स्पष्टतया भाषान्तररूपेण द्रष्टुं शक्यन्ते- यथा वेदे-

बृहता मन उपहृवये मातरिश्वना प्राणापानौ।
सूर्याच्चक्षुरन्तरिक्षाच्छ्रोत्रं पृथिव्याः शरीरम्।
सरस्वत्या वाचमुपह्वयामहे मनोयुजा॥

-अथर्ववेद-५/१०/८

यद्यप्येष मन्त्रः मनसः बुद्धेश्च विषये प्रथमदृष्ट्या प्रतिपादयन्-प्रतिभाति तथापि अत्रैतदवश्यमेव ध्येयमस्ति यदृषयः प्राचीनपारिभाषिकशब्देषु सार्वकालिक-पदार्थान् ब्रुवते मन्त्रसंकुले यथावसरे। अतः सम्पूर्णं वैदिकसाहित्यमावृतं प्रतिभाति याज्ञिकपरिधावेव यत्र देवता-द्रव्याणां प्राधान्यमस्माकं दृष्टि-पथं व्रजति-तथाप्यद्यतनीय शोधप्रक्रियादृष्ट्या मूल्याङ्कनेनैतेषां मन्त्राणां नूत्नं तत्त्वमाविर्भवति। उपर्युक्त-मन्त्रे सूर्यः, सरस्वतीत्यादि देवताश्च स्तुताः परन्तु मनसः उपलक्षणेन बुद्धेः, मनसः बुद्धेश्चैकी करणाय स्थिरीकरणाय शोधोद्देश्यं प्रति गमनाय तयोः पञ्चप्राणानां नियन्त्रणं लक्षितम्, येन सूर्यवत्प्रकाशके स्यातां चक्षुषि श्रोत्रेच श्रृणुयाताम् विशेषार्थयुक्तं शब्दम्। अतः शोधप्रविधिः यः निर्दिष्टोऽस्ति वैदिक-साहित्ये तत्र एकाग्रचित्ततायाः प्रथमं स्थानमस्ति येन धैर्यमुपजायेताऽनुसन्धानकर्मणि, दुरूहसमस्यास्थले च तन्माध्यमेन प्रज्ञा प्रयोगो हि स्यात्तत्समाधाने। ऋग्वेदेऽपि एकं सम्पूर्णं सूक्तमेव मानसिकसबलतायै ऋषिणाप्रोक्तमस्ति येन सत्यवस्तुनोऽन्वेषणे, सत्यतोपलक्षित-नूतनवस्तूपलब्धये बुद्धिः नस्याल्लौकिकविषयगामिनी। वयं जानीमो यच्छोधप्रविधौ परिकल्पनायाः स्थानं महत्त्वपूर्णं भवति। परन्तु परिकल्पना ज्ञानारूढ़ा, सकारात्मिका, तार्किकी चास्ति नवेति परीक्षणाय ऋतम्भरा-प्रज्ञावत् काचित्प्रज्ञाऽपेक्षिता, यस्याः अवाप्तिः सात्विक-नियन्त्रितबुद्ध्यैव भवति। अत एवाग्रे अथर्ववेदो वदति -

सत्यमहं गभीरः काव्येन सत्यं जातेनास्मि जातेवेदाः।

न मे दासो नार्यो महित्वा व्रतं मीमाय यदहं धरिष्ये॥

-५/११/३

अत्रैतदवधेयमस्ति यच्छोधेन खलु सत्यान्वेषणमेव भवति वस्तूनाम्। यदाऽन्वेषणीयविषयकल्पनायाः सप्रमाणं परीक्षणम् (Testing of hypothesis) भवति तदाशोधार्थी विश्वस्तो भूत्वा व्याहरति यदहं धरिष्ये तत् सत्यमिति। अत्र यद्यपि "धरिष्ये" लृट्-लकारे वर्तते परन्तु तस्य वर्तमानकालेऽपि प्रवृत्तिर्भवति वैदिक-भाषायां बहुविधव्यत्ययसंभवात्। अनेनैव प्रकारेण "सामा सत्योक्तिः परिपातु विश्वतः" ऋ. (१०/३७/२) इत्युक्तिरपिवेदस्य तथ्यान्वेषणं प्रति शोधकं प्रेरयति। यत्सत्यमवितथमन्विष्टं वैदिक-ऋषिभिः तत्कारणादेवोक्तम् तैः-

"वेदाहमस्य भुवनस्य नाभिं वेद द्यावापृथिवी अन्तरिक्षम्।
वेद सूर्यस्य बृहतो जनित्रमथो वेद चन्द्रमसं यतोजाः॥"

-शु०य०वेद २३/६०

अत्रैतद्वाच्यमस्ति यच्छोध-प्रक्रियायामाध्यात्मिक-साधनानामपि योगदानमस्ति येनान्तः प्रज्ञामाध्यमेनास्माकमृषयो ब्रह्माण्डतत्त्वानां अन्वेषणं याथातथ्यरूपेण चक्रुः। अस्यैवात्रनिदर्शनमस्ति। तथैव वेदाङ्गसाहित्येष्वपि प्राचीनशोधप्रक्रियायाः सूत्राणि वर्णितानि सन्ति यथा भगवतोवेदपुरुषस्याङ्गिनो व्याकरणशास्त्राङ्गस्य व्याकरणप्रासादस्य चतुर्दश सूत्रस्तम्भाः पाणिनिना प्राप्ताः भगवतो भूतभावनस्य भवस्य ढक्कानिनाद-जनित शब्दैः। ते शब्दाः आदावव्यक्ता एव आसन् परन्तु पाणिनिः स्वकीययाऽनुसन्धानप्रज्ञया तमव्यक्तं शब्दं चातुर्दशसूत्रेषु व्यभजत-अइउण्, ऋॢक्. एवोङ्., ऐऔच्, हयवरट्, लण्. ञमङणनम्, झभञ्, घढधष्, जबगडदश्, खफ छठथचटतव्, कपय्, शषसर्, हल्, - इत्याकारेषु अस्यैव व्याकरणदर्शनस्य विश्लेषणं स्फोटादि[२] तत्त्वपरिशीलनमाध्यमेन व्याकरणस्योत्कृष्टग्रन्थेषु विहितमस्ति, यदन्वेषणीयम्। अद्यतनीयास्तु वैज्ञानिकाः केवलं प्रत्यक्ष एव रमन्ते न विश्वसन्त्याध्यात्मिक-तत्त्वेषु। मन्ये शब्दविज्ञानेऽर्थविज्ञानस्यावगमनाय, तदाधारेण च वस्तु-साधनाया लौकिकी प्रज्ञाऽध्यात्मप्रसूताऽपेक्षिताऽस्ति। पातञ्जलभाष्यस्य पश्पशाह्निके यादृग्विचारोविहितोऽस्ति शब्दानुशासन-विषये तदेतदेव सूचयति यन्न केवलमन्तः करणप्रमाणेनैवाधारेणान्वेषणीयस्य पदार्थस्य निश्चयो भवति प्रत्युत्तत्राप्याध्यात्मिक-पुरुषाणां विभिन्नस्तरीयप्रज्ञानां माध्यमेन यन्निर्णयोऽनुभूतिश्च भवतः तत्र सम्यग् विचारो भवति विद्वन्मण्डले। अतः पातञ्जलभाष्यादिग्रन्थविषयाः प्राचीनशोधप्रविधेः प्रयोगस्य परिणामरूपाः सन्ति। माण्डूक्योपनिषद्येतदुक्तमस्ति यद्यथा स्वप्नो दृश्यते तथैव वेदान्तेऽपि विचक्षणैर्जगदिदमन्त्रभाति- यथा-

स्वप्नमाये यथा दृष्ट गन्धर्वनगरं यथा।

तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः॥ गौणपदका - मा० उ० वैतथ्यप्र०

शोध-कर्मणि कल्पनायाः महत्वन्त्वस्त्येव, सा कल्पनाऽऽधुनिकशोधप्रविधेः स्वप्न-शब्देनोक्ताऽस्ति दर्शनशास्त्रे, तस्मादेतत्सिध्यति यत्प्राचीने कालेऽपि संस्कृत-विदुषां प्रायोगिकः शोधप्रविधिरासीदिति। आधुनिक-युगस्य महान् वैज्ञानिकः श्रीमान् -APJ

Abdul Kalam महोदयस्य च छात्राणां कृते स्वप्नदर्शनस्य स्पष्टः सन्देशोऽस्ति।

"Shall I be successful ? I really don't know. But what I do know is that there is no greater power in heaven or on earth than the commitement to a dream. Dreams hold something of that energy which lies at the heart of all

gether." - **Ignited Minds** -

वेदाङ्ग-भूते ज्योतिष-शास्त्रेऽपि गणनाविधिना शोधस्याज्ञातवस्तुनोऽन्वेषणं कर्तुं शक्यत इति सारतत्त्वरूपेण सन्देशः प्राप्यते। संगणनापद्धतिरेव बीजमद्यतनीयस्य संगणकाधारित-शोध-कार्यस्य। कालगणना-माध्यमेन प्राकृतिकवस्तूनां गुण-कर्मप्रभावाकलनं, नक्षत्रादीनाञ्च तथैवोर्जा-गति-वेगसघनता, तत्प्रतिक्रियाऽवकलनं ज्योतिष-शास्त्रस्यानुसन्धानपद्धतिरेकाऽस्ति, यस्याधारेणाज्ञातकालिक-घटनाचक्रमुद्घोषयति। तथैव वास्तुशास्त्रविज्ञानेऽपि वास्तु-पुरुषस्य कल्पनया कश्चिदनुसन्धानपद्धतिः प्रचलिताऽऽसीदतिप्राचीनेकाले वैदिक-समाजे यया भवनादिनिर्माणस्य पूर्वं भूम्याः शोधनं भवति स्म। कालान्तरे भाषा परिवर्तिता जाता विज्ञानस्य, पाश्चात्यप्रभावात्तस्मादेतत् ज्योतिषशास्त्रीयं विज्ञानं बलादालोचनापात्रमभूत्। एतदत्रावश्यमेवावद्येमस्ति यदाधुनिक-विज्ञान-शास्त्रे यत् विज्ञानस्य $E = Mc^2$ इति संकेत-शब्दस्य तात्पर्यं भवति तदेव वास्तु स्वरूपस्य "ॐ"-इत्यक्षरस्यापि भवति। अतएवास्माकमृषिभिः "ॐ"-इत्यस्यनित्यस्याक्षरस्य, सर्वसमस्यासमाधानार्थमन्वेषणं कृतम्, तथैव(卐) स्वस्तिकेति चिह्नस्यापि, यस्य विश्वधर्मेषु विभिन्नानि स्वरूपाणि प्राप्यन्ते, तत्र शोधोऽपि जातोऽस्ति "स्वतिक"- इति नाम्ना। पुस्तकमपि प्रकाशितमस्ति। अत्र विषये सुविचार्यैव N.H. Sahasrabudhe तथा R.D. Mahatme इति विद्वद्भ्यामुक्तम् यत् स्वस्तिकादयः आधुनिकविज्ञानेऽपि संकेतिता इति - द्र. पृ. 4,5 Secrets of Vastushastra अनेनविश्लेषणेनैतत् सिध्यति यदत्रज्योतिष-शास्त्रे, वास्तुशास्त्रे च अनुसन्धानस्य प्रायोगिकः पक्षः प्रविधिश्च संकेतितौ। तदेव वास्तु-शास्त्रीयं विज्ञानं जयनति वास्तुकलामनघाम्। अतएव वक्तुं शक्यते यदस्ति कला-विज्ञानयोः महान् सम्बन्धः। वेदाङ्गेषु छन्दस अपि खल्वाविष्कारः शोधप्रविधेरेव जात इति कथनेऽदोषः। तच्छन्दः काव्याक्षराणि नियन्त्रयति। आचार्य पिङ्गलोऽस्याविष्कर्ताऽनुसन्धानस्यैको-

विधिरूपस्थापयामास येन सर्वेषां ऋग्वेदीयादिमन्त्रगुम्फितानां पदानां पद्मतितानाञ्चाक्षराणां सम्यक्तया कालान्तरे गणना कर्तुं शक्येत, तथा चानुष्टुबादि-छन्दोबद्धेषु पद्येषु यावन्त्यक्षराणि भवन्ति, तद्गत-स्पन्दनप्रभावेण कञ्चिद्विशिष्टं फलमपि भवतीति तेन शोधस्य विधिना संकेतितम्। अतएव गायत्री मन्त्रोपासनायाः अन्येषाञ्च स्त्रोत्राणामपि सुप्रभावोऽवलोक्यते। एतत् सर्वं विविच्यैव विन्टरनित्सो हि कथयति यत् सर्वेषां विश्वगतानां साहित्यानां कालकवलितायां जातायां सत्यामपि मौखिक-परम्परा-संवर्द्धितानि भारतीय साहित्यादीनिन नक्ष्यन्ति यथा-

"And today if all manuscripts and printed books were lost, still Indian literature would not in any way there by disappear from the surface of the

and reciters. For even the works fo poets have been meant in India never for

अत्रावध्येयमस्ति यच्छन्दस्सु निबद्धमन्त्राणां श्लोकानां कंठाग्रीकरणं रुचिप्रदं भवति नियताक्षरवतां छन्दसां स्वरूपस्याभ्यास-सारल्याच्चपुनः स्मरणं संभवति। एष विधिः प्राचीनकवीनां आविष्करणमेव। अनेनैव प्रकारेण निरुक्त - वेदाङ्गस्याप्यनुसन्धानस्य प्रायोगिकप्रविधि-क्षेत्रे महत्त्वमावहति। शब्दः, शब्द-गतश्चार्थः अभेदरूपेण तिष्ठतः। शब्दानां साधुत्वासाधुत्वयोः[१] परिशीलनं व्याकरणशास्त्रं नियत-नियमानामालोक एव विद्यते, तदतिक्रमणमश्रेयसे मन्यते, व्याकरण-शास्त्रे, परन्तु निरुक्तकारेष्वन्यतमो महात्मा यास्कः वैदिक-पदानां पदार्थावगमनाय, प्राप्त-संस्कृत-व्याकरण-ज्ञानाविष्कृतया निर्वचन-प्रज्ञया[२] नूतनः परन्तु तार्किक-पन्थानमाविष्कृतवान् इति नूतनानुसन्धान मार्गः भाषाविज्ञानक्षेत्रस्य वर्तते येनाधारेण न केवलं वेदस्यैव समुचितं भाष्यमभवत्, प्रत्युदद्यापि तत्प्रभावेण शास्त्रीयं व्याख्यानं क्रियते विदवद्भिः।

अनेनैव पथा गच्छन्तो वयं कल्प-वेदाङ्गस्याऽपि महत्त्वे शोध-प्रविधिक्षेत्रे परीक्षितुं शक्नुमः। वेदांगकल्पः स्वविषयान् मन्त्र-ब्राह्मणेभ्य एवाहरति। कात्यायनादयः कल्पकाराः स्वमीयानुसन्धान-पद्धत्या गभीरं भावं यज्ञमीमांसायाः अल्पाक्षर[३]-युक्तेषु कल्पसूत्रेषु निदधति। यज्ञमीमांसा, यज्ञानांसिद्धान्ताश्चाविरोधक्रमेण तैः कल्पकारैः कल्पिता इति प्राचीना परन्तु नित्यनूत्ना, वैज्ञानिसी नुसन्धानपद्धतिरस्माकमाचार्याणाम्।

शिक्षा-वेदाङ्गम् तु स्वकीयानुसन्धानपद्धत्या क्वचित्-चिकित्सकीयं तत्त्वमुद्भावयति, तदनुसारञ्च विद्यार्थिनां कृते नित्याचरणयोग्यामाचार-संहितामाविष्करोति क्वचिच्च शरीर-रचनायाः विज्ञानत्त्वान्युद्भावयत् निर्धारयति विशेषाक्षर-शबद-वाक्योच्चार-पद्धतिम्। अनेन प्रकारेण सर्वाणि वेदाङ्गानिनानाविधानाम् अनुखंधानपद्धतीनाम् प्रादुर्भाविकानि सन्ति। तथैव साहित्य-शास्त्रेऽपि खल्वनुसन्धानस्य प्रायोगिकं स्वरूपमुपलभ्यते। तत्र संस्कृत-साहित्यक्षेत्रं, यथा वयं जानीमोयदति विपुलं विद्यते। सा च विपुलता संस्कृत-भाषा-साहित्ययोः नानाविधां मानवप्रवृत्तिं, तामनुसृत्य प्रवृत्तानां काव्यादीनां वैविध्यकारणादपि मन्यते। तत्र मुख्यरूपेण लक्ष्यग्रन्थाः(४) लक्षण-ग्रन्थाश्च पाठकानां समक्षमायान्ति। लक्ष्यग्रन्था त एव यत्र लक्षणानि संघटन्ते, वा घाटयितुं शक्यन्ते लक्षणानि। एतदत्रावधेयमस्ति यत् काव्यधारासु मानवमूल्यावगमन-हेतवे,(५) मानवानां जीवानामप्यन्येषां मनोविज्ञान-तत्त्वानामन्वेषणस्याभियाने(६) मम्मटादीनां लक्षणग्रन्थप्रवृत्तिर्बभूव। कथानक-वृत्तान्त-शब्द-वाक्या-दीनां गभीरपरिशीलन-माध्यमेन परम्परागताचार्याणां निर्दिष्ट-सिद्धान्ताधारेण लक्षणग्रन्थकाराः नानाविधान् सिद्धान्तान् साहित्यस्याविष्कृतवन्तः येषां विश्वसाहित्यसमीक्षण-परीक्षण-सन्दर्भे महत्त्वमनुभूयते। एषो हि विचित्रो वर्तते भारतीय-विदुषामाविष्कारः यत्र विश्वसाहित्य-समीक्षण-सिद्धान्ताः, पाश्चात्य विदुषां तारकायन्ते। उदाहरणम् यथा दर्शनशास्त्रस्य कार्यकारण-भावयोः सिद्धान्तालोके रससिद्धान्तो वर्ततेऽत्यन्तः प्रभावकरः यो निरूपयति मानवस्य मनोभावनामवस्थानकूलां हर्षे विषादे च मनसः स्थितिं विशेषामुद्भावयति कदाचिच्छा कुन्तल-वृत्तान्तमाध्यमेन, कदाचिच्च यक्ष-वृत्तान्तसमीक्षण-व्याजेन। यदा दुःखं मस्तके पतति तदा तन्निपातेन जनान् रोदयतिजडात्मिका हि शिला, परन्तु तादृशीमपि शिलां भवभूतिः स्व-प्रज्ञया रोदयति। सामान्यीकरणसिद्धान्तेन रसस्य नाटक-दर्शकेष्वपि स्थायी भावमुद्भावयति कश्चिन्नाटककारः, तादृग्रसाद्यन्वेषणमवश्यमेवनुसन्धानविधेः प्रायोगिकत्वमस्तीति स्वीकरणीयमेव। अनेनैव प्रकारेणायुर्वेद-शास्त्रस्याप्याविर्भावः ऋषीणामनुसन्धानदृष्टेः परिचायक एव, यत्र शोध-शब्दः शारीरिक-विज्ञान सन्दर्भे परिशोधनार्थे प्रयुक्तः। 'शोधनं शमनञ्चेति समासादौषधन्द्विधौ। सूत्रस्थानम् - प्र.अ.'' अष्टाङ्ग-हृदयम् अर्थात् ओषधं द्विविधं भवति-शोधनम्, शमनञ्च। अत्र शोधन-शब्देन परिशुद्धि-करणम्। आधुनिक संशोधनेऽपि समस्यायाः संशोधनं विधाय तद्गतः पदार्थः यथार्थ रूपेण शोधार्थिना

लोकेऽवतार्यते। चिकित्साशास्त्रस्येतिहासे, विशेषरूपेणास्माकं भारतीयसंस्कृतौ सिद्धान्त एषः विरेचनपद्धत्या वस्तुनः परिमार्जनमुच्यते। मन्ये निदानात्मकश्चानुसन्धानं तु पूर्णरूपेणायुर्वेदीय सिद्धान्त एव लीयते- यत्र रोगस्य अनुसन्धानपक्षे समस्यायाश्च, लक्षणं, परिभाषणं (अनुसन्धान-समस्यासन्दर्भे) प्रस्तूयते। अनेनैव प्रकारेणास्माकमृषयः प्राचीने काले विकसितयास्वकीयानुसन्धान पद्धत्या न केवलं स्थूल-शरीरदोषाणामाकलनं विधाय तदुपचारं चक्रुः प्रत्युन्निदानमपि तेषां रोगप्रकृति ज्ञानाय, तत्प्रकृत्यपनोदनायाहारादिनिर्धारिणं चापि चक्रुः। अत एवायुर्वेदशास्त्रविधोपचारेण न काचित् अपरा विकृतिरुपजायते यथाऽऽधुनिक-चिकित्साशास्त्रविधोप-चारेणाऽनुभूयतेहर्निशम्।

तथैव भारतीय-दर्शनेषु न्याय-वैशेषिक-दर्शनयोः पदार्थनिरूपण-प्रसंगे ''त्रिविधा-शास्त्रस्यप्रवृत्तिः, उद्देशोलक्षणं परीक्षा च'' - वाक्यमनुसन्धानसूत्रमेव प्रतीयते यत्र सर्व-प्रथमं विवेच्यमानानां दार्शनिक-तत्त्वानां कल्पना क्रियते, तेषां नामानि च प्रस्तूयन्ते। आधुनिकानुसन्धान-दृष्ट्या-परिशीलनेनैतस्मिन् वाक्ये सर्वप्रथमं कल्पनात्मिकायाः समस्यायाः प्रकरणमागच्छति शोधार्थिनः बुद्धौ। कल्पना च दृष्ट-भौतिक-जगद्विलास प्रकृत्याधारेणैव संभवति, तस्य जगत आभ्यन्तररचनाघटकनिष्पत्तिहेतवे। अत एवाह नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते। अपि तु सन्दिग्धेऽर्थे। तथा च व्युत्पाद्यते न्यायशब्दः - नीयते विवक्षितोऽर्थः येनेति न्यायः ''-द्र. S. R. IYER तर्कभाषा। एतत्सर्वं खलूपरिष्टादूक्तं प्राचीनामार्षीं प्रज्ञामेव प्रतिपादयति शोधस्यानुसन्धानस्य वेति न शंसयः गौतम-कणादयोः परमाण्वनुसन्धानम् न तिरोहितम्, यस्याद्यविकसितं रूपमाधुनिक-परमाणुवैज्ञानिकैः विविधरूपेण साध्यमानमस्ति। अर्थात्-नासा - वैज्ञानिकैः 'प्रोटोन' - इति परमाणुद्वयस्य परस्पर संवेगपूर्वकंसंघर्षणं संयोजन-माध्यमेन कृतं तस्यमूलावधारणा गौतम-कणादयोः न्यायवैशैषिक-सिद्धान्तेषु स्थितावर्तते। ब्रह्माण्डतत्त्वंपरमाणूनां विस्फोटमाध्यमेन वीचितरंगन्यायेन, वारि-वीचितरंगन्यायेन वा तथा च कदम्बमुकुलन्यायेन प्रादुरभवदिति गोतम-कणाद-शास्त्रयोः सिद्धान्तः। उपर्युक्तं वैज्ञानिक-संशोधनश्चापि तदेवानुवदति। भेदस्तत्र स्वानुभूतिप्रमाण-वशात्साधारणजनानां कृते नयनविषयी-करणाभावः आसीत् तस्मिन् काले, अद्य तु तद् विपर्ययराद्धान्तः उदाहरणं चोपलभ्यते। अतः एतत् सर्वं ऋग्वेदीयार्षीं प्रज्ञां स्मारयति या प्रज्ञा नासदीयसूक्ते, हिरण्यगर्भ-सूक्ते च विशेषरूपेण

निहिता प्रतिभाति। परन्तु सर्वत्रैवास्माकं प्राचीनेषु शास्त्रेषु-तपश्चर्यायाः आध्यात्मिकदृष्टेश्चाश्रय अनुसंन्धाने नूतनतत्त्वान्वेषणायावश्यक आसीत्।

तथैव समुद्र-मन्थन-प्रसंगे विषदुष्प्रभाव-शमनाय नीलकण्ठस्य, जल-विषविनाशाय भगवतो हि कृष्णस्य पृथिव्याः प्रदूषणदोषनाशाय नरसिंहस्यावतरणमपि ऋषीणां, देवानामनुसन्धानपद्धतिः, सूत्राणि च सन्ति।

अनेनप्रकारेणैतत् सिध्यति यदस्माकं संस्कृत-वाङ्मये बहूनि-अनुसन्धान-सूत्राणि, निहितानि सन्ति येषां निदर्शनं सूत्रसाहित्य-सर्जना वर्तते। तानि सूत्राणि खल्वाधुनिक विज्ञान-सूत्रवत् (Formulae) सन्ति - येषां प्रकृति ज्ञानेन सर्वविधशोधक्षेत्राणां कृतेऽनुसन्धान मार्गः परिपुष्टो भविष्यति - तत्राध्यात्मिक-विज्ञाने विश्वासः तदवगमनाय प्रयासश्च परमावश्यकौ पदार्थौ वर्तेते। उदाहरणार्थमद्यशल्यक्रिया प्रकोष्ठे (Operaton Theater) गमनात्पूर्वं, उपानहौ चिकित्सकाः बहिरेव मुञ्चन्ति, तथैव कम्प्युटर प्रयोगशालायां कम्प्युटर-वैज्ञानिकाः कुर्वन्ति। एतत् सर्वं मन्दिर मस्जिद्-गिरिजा-गृह-गमनात् पूर्वविहितां प्रवृत्तिं भक्तानां स्मारयति। अत एतत् सर्वं विलोक्य संस्कृतवाङ्मयेऽनुसन्धान सूत्राण्यन्वेषणीयानि सन्ति।

टिप्पणी

पृ. १

(१) The total energy of the universe remains constant.

- Advait vedant and modern physics. Dr. Jogiraj Basu

(२) प्रकृतेर्महान् ततोऽहंकारः तस्माद्गणश्चषोऽशकः।
तस्मादपिषोऽशकात् पञ्चभ्यः पञ्चभूतानि - सां.का.

(३) Research is careful investigation or inquiry esp. Through search for new facts in any branch of knowledge. "Systematized effort to gain new knowledge, we call research.

- Redman & Mory

- शोधप्रदिधि P. 2- गणेश पाण्डेय

पृ. २

(१) द्र० तर्कसंग्रहः, तर्कभाषा च................

(२) अथातोधर्मजिज्ञसा - द्र० अर्थसंग्रहः।

पृ. ४

(१) अध्यवसायो बुद्धिर्धर्मोज्ञानं विराग ऐश्वर्यम्।
सात्त्विकमेतद्रूपं तामसमस्माद् विपर्यस्तम्।। सां० का० २३।।

(२) यज्ञाग्रतो दूरमुदैति० शु० य० वेद - ३४/१

(३) 'शुद्धे चेतसि तस्यैव स्वात्मज्ञानं प्रकाशते'' - योगशिखोपनिषद् - ६५

(४) वस्तुसच्चिदानन्दानन्ताद्वयंब्रह्म - वेदान्तसार

(५) गीता - १५/६

(६) भाग्योदयेन बहुजन्मसमर्जितेन सत्संगमं च लभते पुरुषो यदा वै।
अज्ञानहेतुकृत मोहमदान्धकार-नाशं विधाय च तदोदयते विवेकः।

- भागवत म०पु० - २/३/७६

पृ. ६

(१) यथावयं काव्यशास्त्रस्य रससिद्धान्ते प्राप्नुमः।

(२) द्र० शोधः स्वरूप एवं मानक व्यावहारिक कार्यविधि - पृ. २

"अनुसंधान वह है जो अवलोकित तथ्यों के सम्भावित वर्गीकरण और सत्यापन करते हुए पर्याप्तरूप में वस्तु विषयक और व्यवस्थित हो। - बी. एम. जैन"

पृ. ७

(१) Clifford woody - "Research comprises difining and redefinign problems, formulating hypothesis or suggested solutions, collecting, organizing and evaluatiny data, making deducations and reaching conclusious and at last carefully testing the couclusious to determine whether they fit the formalating hypothesis. - C.R. Kothari

(२) डॉ० वागीश शास्त्री।

पृ. १४

(१) द्र० अभिज्ञान-शाकुन्तलम् - प्रथम अंकः

(२) द्र० तेजोबिन्दूपनि० तथा च अनुसन्धानपद्धति

- डॉ. वागीश शास्त्री (सारस्वती सुषमा)

(३) द्र० शोधः स्वरूप एवं मानक व्यावहारिककार्यविधि (लेखक महोदय का नाम नही मिल शका) पृ. ८

(४) द्र० शोधः स्वरूप एवं मानक व्यावहारिककार्यविधि (लेखक महोदय का नाम नही मिल शका) पृ. ८

(५) साक्षात् संकेतितं योऽर्थमभिधत्ते स वाचकः - का. प्र. २/७)

(६) द्र० तर्कभाषा - शब्द-प्र०

(७) द्र० शोधः स्वरूप एवं मानकव्यावहारिक कार्यविधि - पृ. ६

Discovery : An act or process of finding something or learning about something that was not know about before ; the discovery of amtibiotics in the 20th century... A thig fact or person that is found or learned about for the first time.. Oxford Advanced hearner's dictionary.

(A) One discovers - that is, uncovers - something that is already there, something that has existed but is generally ------. A chemical element, a planet or star, a creature long thought extinct are discoverd. One in vents things that have never before existed. The transistor, the wheel, the screw, an invention is a unique aplication of known principles and according to the laws of countries where inventions can be patanted, must be embodied in a specific devic. That is, ideas cannot be patented, only devices or precesses. see Bloomsbury dictionary of differences. Page-107 by LAURENCE URDANG.

(क) Vedanta and modern science - by Ajit kumar Sinha - Page 104-5

(अ) All philosophy is like a tree : wrote descartes ' The roots are metaphysics, the trunk is physics and the branches are all the other sciences - (Quoted in Capra (1982), P. 55 (See Capra's the web of life - page - 12)

पृ. १६

(१) Research is an academic activity and a systematize effort to gain new knowledge - Research Methodology - Deepak Kumar - P. 12-13

(२) द्र० वेदान्तसार - सदानन्द-योगि-कृतः

"The basic tension in one between the parts and the whole

- Fritjof Capra (The web of life - Page - 17)

(३) बृह० उप० प्रथमोऽध्याय -

(४) द्र० The web of life - by Capra - Page - 30

(५) द्र० Research Methodolog - Page - 1; By C.R.Kothari (पृ. १७)

(६) द्र० Research Methodolog - Page - 1; By C.R.Kothari

(७) द्र० काव्यप्रकारस्य चतुर्थोल्लास:

(८) Purification of passion's - (Butcher) See a critical approach to classical Indian poetics - by R.S. Tiwari - Page - 64

(९) A good design is often characterised by adjectives like flexible appropriate, efficient, aconomical and so on. Generally the design which minimises bias and maximises the reliability of the data collected and anylysed is considered good disign - C.R. Kothari

- Research methodology - Page 33

(१०) द्र० संस्कृत-शोध : वैदिक-अध्ययन (डॉ. कृष्णलाल) पृ० २८

(११) अस्मादेवकारणात् न्याय - वैशेषिक शास्त्रयो: परार्थानुमानस्य पञ्चावयवा: स्वीकृता: सन्ति।

(१२) द्र० संस्कृत-शोध: वैदिक-अध्ययन (डॉ. कृष्ण लाल) पृ० २८

(१३) Though there is a specific purpose behind each research study, however, the objectives can be broadly classified as under - To obtain familiarity of a phenomenon. To determine the association or in dependence of an activity to determine the characteristics of an individual or a group of activities and the frequency of its (or their) occurrences. (Deepak K. Bhattacharya) - Research methodology - Page 13 by

(१४) द्र० संस्कृत-शोध: वैदिक-अध्ययन - पृ० २४ - (डॉ. कृष्णलाल)

(१५) Behind every book there is a man and behind the man is a Rag.

- A critical approach to classical Indian poetics - Page - 373

- By R.S. Tiwari

(१६) No dates regarding when kalidas lived and wrote have yet been ascertained. Yet the cousensus is that he lived in Ujjaini (Ujjain) in the Madhyapradaesh of to day) and that he was a poet and play wright at the court of one king vikramaditya.

(१७) William Shakspeare was born on or about the 23rd April, 1564, at stratford - on - Avon, Wariwckshire Hudson.

(१८) Executive summary : The executive Summary should include.

(अ) Objectives of the Research project.

(ब) Nature of the decision problem.

(क) Key Resluts.

(ड) Conclusions (Opinions and interpretations based on the research)

(इ) Recommendations for action - Page - 207 - Research Methodology - by - Deepak Kumar Bhattacharya

(१९) मानव क्रिया के सभी क्षेत्रों में शोध का अर्थज्ञान तथा बोध की निरन्तर खोज की जाती है - (वंदना वोहरा) - रिसर्च मेथोडोलोजी पृ. १ - प्रस्तावना।

(२०) द्र० रिसर्च मेथोडोलॉजी - पृ० १४-१५ (डॉ. बी. एम्. जैन)

(२१) All progress is born of inquiry.Doubt is often better than over confidence, for it bads to inquiry and inquiry leads invention is a famous Hudson Maxim in context of which the significauce of research can will be understood. Increased amounts of research make progress posible. Research inculcates scientific and inductive thinking and it

promotes the development of logical habits of thinking and organisation. Page - 5, Research methodology - By C. R. Kothari.

(२२) शास्त्रीयेष्वनुसन्धानेषु (१) नवीनतथ्यानाम् (२) नियमानाम् (३) सम्बन्धानाम् (४) कारणानाम् (५) परिणामानाम् (६) परम्पराणाम् (७) नवीनविचाराणाम् (निष्कर्षाणाम् दृक्कोणानाम्) च गवेषणा नामानुसन्धान - कोटिः - डॉ० वागीश शास्त्री।

(अ) यथा - कापरा कथयति - The nineteenth century is best known for the esteblishmant of evolutionary thought, but it also saw the formulation of cell theory. the beginning of modern embreyology, the rise of microbiology, and the discovery of the laws of hredity. The web of life - Page 23

(ब) Management Research, like any other research therefore is a rigorous scientific activity. - Resedarch Methodology - Part 2

- By Deepaka Kumar Bhattacharya

पृ. २३

(१) A careful investigation or inquiry specially through search for new facts in any branch of knowledge - The Advanced learned's dictionary "Systematized effort to gain new knowledge - Page (I) Research

Methodology - by C.R. Kothari

पृ. २४

(१) Do

(२) The surface of th earth, which we have always considered to be the environment of life, is realy part of life - See the web of life by friltjof capra page - 106

(३) Intuition is the ultimate source of advancing knowledge. It is capable of giving direct vision of reality when it operats without the media of empirical consciousness. The vedic seers claimed that they had darshan or direct vision of reality. Direct vision of reality is a rare phenomenson which may occur only in persons with supra - normal consciousness. Vedant & modern science - page - 112

- by Ajit Kumar Sinha

(४) Cells were regarded as the basic building blocks of living organisms during the nineteenth century, the atttantion sifted from cells to molecules lowards the middle of the Twentieth century, when geneticists began to explore the mobcular structure of the gene - F. Capra - Page 77 the web of life.

(५) Effective life Management - by Swami Amartyanand.

"Also see the chapter importance of fresh research in management Decision - Research Mathodology. - By Dipak Kumar - Page - 20

(६) अतः सूर्यस्य तापनियन्त्रणाय पृथिव्यां के उपायाविधेयाः यैरेषा भूमिः तत्तापमधिकं शीतलीकर्तुं तथा च पार्थिवपदार्थानां कृते सह्यं विद्यध्यात् ?

(७) सर्वेक्षणादिमाध्यमेन सामाजिकानां शैक्षणिक-समस्यायाः, आर्थिकसमस्यायाः, व्यावहारिक समस्यायाश्च निराकरणं कथं भवेदिति शोधमाध्यमेन प्राप्तस्य निष्कर्षस्य नियम-कलेवरीकृत्य समाधानम्।

(८) काव्यं यशसेऽर्थकृते व्यवहारविदे। सद्यपरनिवृत्तये कान्तासम्मिततयोपदेशयुजे - अत्र यशशेऽर्थकृते व्यवहारविदे सद्यः पर निर्वृत्तये" - इति शोधोद्देश्यऽपि संघटन्ते।

(९) इन्द्रप्रस्थं वृकप्रस्थं जयन्तं वारणावतम्। प्रयच्छ चतुरो ग्रामान् कञ्चिदेकं तु प्रञ्चमम्- "मम मतानुसारं कञ्चिदेकं तु पञ्चमम्" इति वाक्यस्याविष्करणेन व्यञ्जनावृत्या कौरवाणां मरणभावः प्रोक्त- इति शब्दानुसन्धानं तस्यकवेः शोधकर्मणि वैषयिकशब्दप्रयोगंशति सावधानताप्रोक्ता।

(१०) Information is presented as the basis of thinking, where as in reality the humanmind thinks with ideas, not with information - The web of life - Page 70

(११) तात्पर्यमिदमस्ति यन्मानवीयभावनायाः बीजतत्त्वं स्थायीभावरूपेणोपस्थाय नाटकादिक्षेत्रेष्वनुसन्धाने तस्य सामान्यीकरणे न वस्तुनः गहवरे गमनाय प्रेरयति संस्कृतशास्त्रज्ञः। अद्यापि साधारणीकरणं, सामान्यीकरणञ्च शब्दौसामाजिक-शोया-प्रविधौ प्रयुज्येते - तदाधारेणैव। -द्र० - 'सामान्यता' (Generality) - शोधप्रविधि - डॉ. गणेश पाण्डेय

"सामान्यीकरण" - (Generalization) - रिसर्च मैथ्डोलॉगी - पृ० २५ -वंदना वोहरा

The aim of yoga is to bring down the supernatural consciousness to earth. Yoga enables an individual to orient his consciousness towards the realization of divine conscionsness. It enables an individual to have mastery over his own self.

अब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी० शु० य० वेद - अध्याय : २२/२२

(११) अस्मिन् प्रकरणे ऋषीणां वैज्ञानिकीदृष्ट्याविष्कृता-वर्तते

द्र० The web of life - विशेषरूपेण Models of self-organization - इति प्रकरणं द्रष्टव्यम् -(कापरा) Rigveda 10/129

* तर्कसंग्रहः पृ. २९

(१) यथा संगणक-विज्ञान-क्षेत्रे, चिकित्साक्षेत्रे, आभियान्त्रिसी क्षेत्र,

(२) यथा Literature Review in management Research - See Page 24, 25 - Research Methodology -By Dipak K. Bhattachary

(३) शोध-प्रविधिः -गणेशपाण्डेय

सिरर्च मेथीडॉलोजी - डॉ. B. M. Jain इत्यादि।

(१) Systematized effort to gain new knowledge, we called research

-Redman and mory.

(२) After identifying and defing the problem as also accomplishing the relating task, researcher must arrange his ideas in order and write them in the form of an expreimental plan or what can be described as, Research plan'. C. R. Kothari - P. 52, Research Methodology

पृ. ३०

(१) गीता - ७/३ - मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।

यततामपि सिद्धानां कश्चिन्मां वेत्तितत्त्वत: ॥

पृ. ३१

(२) संकल्पमूल: कामो वै यज्ञा: संकल्पसंभवा: ।

व्रतानि यमधर्माश्च सर्वे संकल्पजा: स्मृता: ॥ मनु०२/३,४,५

(३) ऋषि - भरद्वाज अपनी तपस्या के प्रभाव से क्षत्रियोचित-गुण को अपने में आविष्कृत किया था, तथा अन्य वैमानिकादि विद्या के क्षेत्र में भी वे आगे थे।

(४) Whatever you can do or dream you can begin it Boldness has genious, power and magic in it. Begin it now - Goethe. Determine that things can and shall be done, and then be shall find the way.

-ingited minds - by A.P.J. Abdul Kalam

पृ. ३२

(१) See - Problems encountered by researchs in India. R.M. P. 21 by Kothari. "Many researchers take a leap in the dark wihout knowing research methodology. "A research scholar has to work as a judge and derive the truth and not as a pleader who is only eager to prove his case in favour of his paintiff." Kothari

(१) जहाँ अनेक काव्यबन्धो में आश्रित अतिशय श्लिष्ट वचन हो, जहाँ वक्ता का अर्थ

अव्यक्त किन्तुनिश्चययुक्त हो और श्लेषपूर्ण उत्तर से युक्त हो, जहाँ शिलष्ट द्वयर्थक वचनों का विन्यास हो तथा वह प्रधानेतर अर्थ की प्रत्तीति कराए।

- ये पताका स्थान है।

अत: एक प्रकार की यह नाट्यगत-समस्या ही है। द्र. भा. ना. सि. उ. एवं विकास - डॉ. रामजी पाण्डेय

(२) द्र० शोध-प्रविधि - डॉ. गणेश पाण्डेय - पृ. ४८

(३) The method of research utilized in decriptine research are survey method of all kinds including comparative and correclational method. C. R. Kothari - Re. Methodology - P. 3

पृ. ३६

(१) वेदत्वं नाम = अनुपलभ्यमानमूलान्तरत्वे सति महाजनपरिगृहीत वाक्यत्वम्।

- किरणावली - टीका तर्कसंग्रहः

(२) वाक्यं द्विविधं - ''वैदिकं लौकिकञ्च'' - तत्रैवतर्कसंग्रहे।

(३) ऋतम्भरातत्र प्रज्ञा, श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् - यो० सू० १ / ४८.४९

(४) आत्मा वा अरे द्रष्टव्यः श्रोतव्य मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा - अरे दर्शनेन श्रवणेन, मत्या विज्ञानेनेदं सर्वं विदितम् - बृ. उप. २

(अ) अत्र सूर्यादीनां साक्षाद्देवानां प्रार्थनाऽनुसन्धानहेतव एवाज्ञात वस्त्वन्वेषणप्रधानगवेषणमूलैवेतिमतम्।

पृ. ३८

(१) नृत्तावसोन नटराजराज ननादढक्कां नवपञ्चवारम्।

उद्धार्तुकामः सनकादिसिद्धानेतद्विमर्श शिवसूत्रजालम्।

(२) वैरवर्याहि कृतोनादः परश्रवणगोचरः मध्यमया कृतोनादः स्फोट व्यंजक उच्यते।

-भाषावि. की भा. परं और पाणिनि - रामदेवत्रिपाठी - पृ. १०४

"स्फुट त्यर्थेऽस्मादिति स्फोटो वाचक" - वै० सि० मंजुषा

पृ. ४१

(१) व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यः पृथक्कृत्य ज्ञायन्ते शब्दा अनेनेति शब्दज्ञान-जनकं व्याकरणम् द्र.व्याक० म० भा. पश्पशाह्निक-डो. रमाकान्तपाण्डेय

(२) वर्णागमोवर्णविपर्ययश्च द्वौ चापरौवर्णविकारनाशौ।

धातोस्तदर्थातिशयेन योग तदुच्यते पञ्चविधं निरुक्तम्

-द्र० निरुक्तम-भू० - छज्जूरामशास्त्री।

(३) अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम् अस्तोभमन वद्यञ्च सूत्रं सूत्रविदोविदुः॥

(४) रघुवंशमहाकाव्यादीनि लक्ष्यकाव्यानि, काव्यप्रकाशादिग्रन्थाः लक्षणग्रन्थाः।

(५) मेघदूते यक्षवृत्तान्त जीवानमूल्यं दर्शयति कालिदासः, अतएवाभिशप्तमपि तं मुख्यपात्रं निर्माति।

(६) स्थायीभावानामन्वेषणपुरःसरं लक्षणग्रन्थेषु मानवमनसः अवस्थाविशेषं तज्जनितां च प्रतिक्रियां निरुप्य मनोविज्ञानतत्त्वं दर्शयति।

कैथार्सिस्- इत्यादि-पाश्चात्य-साहित्यत्त्वानां संपादो दृश्यते रसादिभिः सह।

*****

ISBN -

Shree Somnath Sanskrit University - Veraval.
Veraval- 362 266, Dist : Junagadh (Guj.) India
Phone : 02876 - 244528, 29, 32 Fax : 244417
e-mail : sssu.veraval@gmail.com,
www.shreesomnathsanskrituniversity.info